त्वा तयोरन्तराले वीथ्या प्रागादि द्विहृदयं कू
रादि द्वे कारादिलकारान्तानष्ट विडकान्तात्का विलि
खेत् डं कफलदं भवति तथाः पद्ममष्टदलं कृत्वाम
ध्ये साध्यं समालिखेत् किंजल्केषु स्वरान्द्वे द्विन्दव
भागशः प्रालिख्य विलिखेत्पश्चाद्वर्णत्रयं विभागतः
ततः शिष्टपत्रेषु मंत्रस्य शिष्टवर्णान्समाहितः बहिर्हृ
दयं कृत्वा अन्तराले तयोर्लिखेत् कादिहान्तान्सवि
रेफ वहिर्भूविम्बमालिखेत् प्रधानदिक्षु तस्याश्च म
नमो जपं समालिखेत् प्रथमोयान्त्यसंयुक्तं च तत्प्री

स्याद्वितीयकं कोणेषु विलिखेचैतद्यंत्रं सर्वार्थसाध
कं पुत्रपौत्रप्रदं लक्ष्मणा माधुः श्रीविजयप्रदं कृत्वा य
स्मारभूतादिनाशनं सर्वकामदं अस्यार्थः अष्टदल
पद्मं कृत्वा तत्कर्णिकायां साध्यनाम समालिख्य द्विशः
स्वरान्संविदं तालिख्य प्रणवदले प्रणवं अकारउकारभे
देन विभज्य विलिख्य सप्तदलेषु मंत्रस्यैकविंशति
वर्णान् त्रिशः समालिख्य हत्तांतरालवीथ्यां कादिव
र्णान् आलिख्य प्रथमदले प्रणवं अकारउकारमकार
भेदेन विभज्य विलिख्य सप्तदलेषु मंत्रस्यैकविंशति
वर्णान् त्रिशस्त्रिशः समालिख्य हत्तांतरालवीथ्यां का
दिवर्णान् आलिख्य प्रथमदले प्रणवं अकारउकारभेदे
न विभज्य विलिख्य सप्तदलेषु मंत्रस्यैकविंशतिवर्णा
न् त्रिशस्त्रिशः समालिख्य हत्तांतरालवीथ्यां कादिव
र्णान् आलिख्य प्रथमदले प्रणवं अकारमकारभेदेन वि
भज्य विलिख्य सप्तदलेषु मंत्रस्यैकविंशतिवर्णान् त्रि
शस्त्रिशः समालिख्य हत्तांतरालवीथ्यां कादिवर्णा
न् आलिख्य भूपुरस्य दिक्षु च कोणेषु विलिखेत् फलं दं
नादिकं परमते शृणु नंदिन् प्रवक्ष्यामि मंत्रमन्यत्र चा
[illegible]रं देवस्य दक्षिणामूर्तेः सर्वैश्वर्यप्रदायकं आद्यन्त
योर्दक्षिणान्तस्य पंचदशान्वितं उद्धृत्य पुनरायस्य
प्रथमार्णं समुद्धरेत् पंचान्तरमं तु यस्याद्यायवर्णं
ह्येयपुनः स्वक्रमेण वदेल्लादि मंत्रः प्रोक्तो नवाक्ष
रैः आद्यवयोर्दक्षिणोर्णः ॐकारः तस्य पंचदशान्विदुः
तेन प्रणवः आद्यस्य प्रथमार्णः अकारः पंचान्तरम

त्रः सर्वैकशिवपंचाक्षरः आद्यवर्णोदयं प्रणवोकारैः व्युत्क्रमेण
अकारप्रणवक्रमेण अकारगुणवक्रमेण तथा ऋषिः शुकसमा
ख्यातोनुष्टुप्छंदउदाहृतं देवताजगतोमादिदक्षिणामूर्तिरव्य
यः तारणाहृदयेप्रोक्तामकारेणशिरःस्मृतं शिखांनमःयदेन
स्याद्धिवायकवचंमतं अकारेणचनेत्रंस्यादस्त्रंतारेणविन्यसेत्
शुद्धस्फुलकवक्त्रिनागविलहाङ्गुष्ठसन्नाननेशुक्लाहारविभूषणं
मणिरत्नाभारककिरीटोज्वले प्रसन्नायहमादिनागगिरामथि
भवानीपतिंस्मरेद्देवोनतिवासिनपराशुहृत्ध्यायेदभीष्टमये इति
ध्यात्वापयजेद्देवंशिवपीठप्ररोहिते पंचाक्षरोक्तविधिनापुरश्च
र्यादिकंतथा पंचाक्षरवत् एवंयोभजतेमंत्रंसर्वज्ञोभवतिप्र
वं अथप्रयोगः तत्रप्रातःस्नानादियोगपीठन्यासांतेमूलेनप्राण
यामत्रयंकृत्वा शिरसिशुकायऋषयेनमः मुखेअनुष्टुप्छंदसेन
मः हृदयेश्रीदक्षिणामूर्तयेदेवतायैनमः इतिविन्यस्यआद्यवद्विनि
योगस्तुकां ॐ हृदयायनमः शिरसिस्वाहा नमःशिखायैवषट् शि
वायकवचायहुं ॐ नेत्रत्रयायवौषट् ॐ अस्त्रायफट् इतिकरषडंग
न्यासंकृत्वा ध्यानमासनसंज्ञानेपंचाक्षरवत्सर्वंकुर्यात् तथा आद्य
द्वादशवर्णांतनस्योयात्मेनेसंयुक्तंपंचमंपंचमस्याथषष्ठस्यापि
पंचकं प्रथमंमाममसमोयेतद्द्वितीयंप्रथमंततः सप्तमस्यतृतीयंस्या
त्प्रथमस्यतृतीयशुक्रं प्रथमोपान्त्यसंयुक्तंसप्तमस्याद्यमक्षरं ततो
योयेनमाद्यस्यसप्तमस्यतृतीयकं आद्यद्वितीयसंयुक्तंसप्तमस्या
द्यमक्षरं प्रथमस्यतृतीयेनआद्योपान्त्यसंयुतं ततःसप्तमद्वितं
दीनारायोयेनवाक्षरः नवस्तेहान्यानिदंकथितःसर्वसिद्धिदः
आद्यमादर्शोयंनस्योयांत्योबिंदुः तेनपंचमस्यपंचमः नकारः
षष्ठपंचमंमकारः प्रथमोयांत्योविसर्गः तेनमः द्वितीयप्रथमं

मकारः सप्तमस्य तृतीयस्थं लकारो पीठस्थितः प्रथमस्य तुरी
यश्चोक्त ईकार उक्तः प्रथमो यान्तविंदुः तेनापि युक्तः तेन कामबी
जमुद्धृते अष्टमाद्यशकारः आद्यस्य तृतीये ईकारः तेन शिकारः स
प्तमस्य तुरीयं वकारः आद्यद्वितीयः आकारः तद्युक्तं तेन वा सप्तम।
स्याद्यं यकारः अष्टमस्य तृतीये मकारः आद्यो यान्तान्त्याद्यः औतं तस्य
आद्यं तेनो विसर्गः ताभ्यां युक्तः तेन ॐ भौ इति सिद्धः प्रणवाद्यः तथा
अन्त्याद्याः एवं प्रदिष्टाः पदैः षड्भिः षडंगकं ध्यायेत् एवं वदेद्देवं शवा
मार्द्धहरिहरं तिनशिवं यजेत् सर्वोदिते पीठं पंचावरविधानतः पुरश्चरण।
कृत्संवर्व सर्वोके नंदिकेश्वरः सर्वोकमिवान्तरोक्तं एवं मंत्रोदितां क्र।
मात्रयोगान्माथको नतः एवं मंत्रोदितादक्षिणामूर्त्तिप्रकरणोदि
तान् ॐ रुद्रायनमः पें शिरसे स्वाहा नमः शिखायै वषट् कवचा।
यहुं शिवाय नेत्रत्रयाय वौषट् सौः अस्त्राय फट् अपत्नगामं दक्षिण
मूर्त्तये शोम्भोविद्महे तिनतोवदेत् ध्यानस्थिराय धीमहि इतिमहितन्नो
वेदमतः धीदः प्रचोदयात् गायत्री नंदिकेश्वरः । श्रीनंदकेश्वरमते ।
अथ प्रवक्ष्ये मंत्रं कथयामि तकतद्य आद्यत्रयोदशो यान्ति स्वराउ
ह्रस्वनंदकः ततस्तृतीयवर्गस्य तृतीये चाद्यषष्ठयुक्त तद्योन्यस्य
न्यस्य द्वितीयकं आद्यान्तवर्णसंयुक्तोन्तृतीयवर्णमुद्धरेत् प
षष्ठस्यंस्मयोमंत्रो प्रोक्तो मन्त्रभयापहः आद्यत्रयोदशः औंउद्योऽस्तो।
विंदुः तेन प्रणवो जातः तृतीयवर्गस्य तृतीयं ज आद्यषष्ठहृतउद्या।
सो विंदुः ताभ्यां युक्ते तेन ज्ञ इति अष्टमस्य तृतीयं सः आद्यान्तो विसर्गः
तेन मः इति ऋषिः कहलो देव्यादिगायत्री छंदः ईरितं देवतास्य मनोः श्री
कंशिवाम्बसंज्याभिधः प्रणवो बीजमित्युक्तं मशक्तिरिति कीर्त्तिताः
षड्दीर्घयुक्तेनानेन षडंगानि प्रकल्पयेत् आदौ रुष्किरमेवं न्यसेह
स्रावयं ततः ध्यायेद्देवं ततो वत्स समाहितमनाश्चिरं शुद्धस्फटिकसं।

वि॰
टी॰
९२३

923

काशंशुभ्रपद्मासनेस्थितं कपर्दमौलिविलसच्चंद्रखंडमनास्मनैः
अभिषिक्तसमस्तागमर्कैंदनललोचनं दक्षिणोर्द्धकरेऽग्रशूलं ज्ञाना
ख्यानंतदधःकरे अक्षमालाचवामोर्द्धपाशंवेधमधःकरे दधानंवि
नयेद्देवमस्मरोगभयापहं इतिध्यात्वाचंयमीदेशेवद्धवेसमीरिते
अष्टपत्रेऽजेवस्त्रवर्तरस्तत्रयाहूते अर्चनांगंद्रव्याद्यैराहूतित्रयसं
श्चैः। अथप्रयोगः। तत्रादानाकुमारियोगपीठन्यासांते शिरसि
कहोलायऋषयेनमः मुखेगायत्रीछंदसेनमः हृदिश्रीमत्संजय
देवतायैनमः गुह्ये श्रींबीजायनमः पादयोः सः शक्तयेनमः इ
तिविन्यस्य ममाभीष्टसिद्धयेविनियोगः इतिकृत्वांजलिकृत्वा सांसीं
सूंसैंसौंसः इतिकरषडंगन्यासंकृत्वा मूलाधारे ॐनमः हृदये
नेनमः शिरसि सःनमः इतिविन्यस्य ध्यानादिउपचारैरंते प्रा
ग्वदंगानिसहस्र लोकपालस्वजादिसर्वंसमापयेदिति अत्रपूजा
मंडलेवनरसत्रयवेष्टितमष्टदलस्तेयं अष्टदलेभद्रिकालान् व
रसैतदाउधानिस्वजयेत् तथा लतत्रयंजपेन्मंत्रमस्तनाशकलेहूं
नेत् नीरालैनेस्वर्णपाणादितनोनेदिन्मसमाचरेत् एवंसिद्धमनो
दिव्यप्रयोगानाचरेत्ततः नास्वालेमध्यपद्ममध्यामध्यंवसंपुट पद्म
त्रामंतरंतस्य मात्मानंचिंतयेत्किंवं संसवदणिपीडषधाराभि
कलेवरं अनेनयोगेनभवेदीर्घायुरस्तनिरामयः। अथमर्थः। ॐका
रस्यनाम्नेकारपत्राष्टकस्यनिमः कारकलिकस्यसंपुटितस्य
मध्यस्थमध्यमामासीनेमंत्रावर्णत्रयचिंगीछेदस्तनयात्मानंवि
नमवेगात्रशिवात्मानंचिंतयेदिमर्थः तथा वेदांगलिमितै
नगरवीशकलेहूंनेन पयःपरिस्लैनेरक्तमस्तस्वविजितेंद्रियः
आरोग्यायुश्रीणांलक्ष्मीरविगाहूलभतेध्रुवं यावत्सावः स्थयाक्रमैः
अत्रिश्रीशानिशोकं आप्नोयिनोविनाकहूः अदघात्स्थापकेष्वि।

नान् गुडूचीशकलान्वा दिनमेमिथोवटद्रुततगाः तिलाद्दूर्वापयः
सर्पिः पायसं च गणाधिपः इक्षुकैः समभिर्द्वैर्जुहुयात्सम।
वासरं क्रमात्कृशशानं निर्त्यमष्टोत्तरं मन्तेद्धितः समाप्तिकान्हि
नान्त्रिंशं भोजयेत्मधुरान्नैः विविधैः स्वादुभिर्भोज्यैरन्नपानादि
केरीणः विकारान्नगुणं नरदिन्वर्द्धयेद्धोमवासरान् होलम्भोरति
र्णादयादारुणंगोपयस्विनी गुरुं संप्रीणयेन्वा दिन्यनाद्ये दैवता।
धिपाः अनेन विधिना साध्यः क्रमाद्दोहृतवादिभिः विश्रुकःसति
रन्नीविरुद्धदोषाणां तमजसा अभिचारेन्वरजीवेघोरोन्मादशिरोगदे
असाध्यरोगेत्तुडातौमोहेरुग्श्लेष्महाभये होमोहंशान्तिदः प्रोक्तः
सर्वसंपत्प्रदायकः अथत्रिजन्मादिवसेद्वैःसमभिराददान् ९
यकशान्तक्रनेन्मंत्रीमधुरैर्भोजयेद्द्विजान् दीर्घमायुरवाप्नोतिनि
यमेन न संशयः अथवा समभिर्द्वैर्जन्मर्क्षेतन जयात्सुधी १०
कारहसंतेन सान्त्रिरूपहवस्तुनमं दीर्घमायुरवाप्नोति नात्र कार्या
विचारणा यथोक्तवाप्तितेयक्रनेदेकादशाहुतीः दिनशःसो।
यमसेव रोगान्निर्त्वा विरादसौ दीर्घमायुस्सलभतेमंत्रशास्त्रवि।
शारदः त्रिजन्मसमुधावल्लीकाश्मीरवकुलोद्भवैः समिद्वैः कृ
तो होमः सहस्रेण हृष्यकर्षकृ अपमृत्युहरोनेदिनसर्वरोगान्वि।
नाशयेत् सिद्धियै विधिनाहोमो महाज्वरविनाशनः अपामार्गस
मिद्धोमस्यमन्नगदापहः लिखेदष्टदलं पद्मं नाश्मध्ये साध्यकं
दिक्षेत्रे द्वितीयस्कं दिक्षु भूमंडलं साध्य सप्तमंत्रांतं सबिंदुकं वि
दिक्षु वचन्तयं स्यो द्वितीयं बिंदुभूषितं यंत्रमरत्तुं जययसेदंजपहोमा।
दिसाधितं एतं मृत्युंजयाकं देवाह्रीकस्त्रप्रकोष्ठके अरोगविषा
दीनां नाशनं मृत्युभंजनं कीर्तिवश्यादिकांतिप्रदं नात्र संशयः
असाध्यैः । अष्टदलपद्मे विरच्य तत्कर्णिकायां प्रणवं तन्मध्ये साध्य

वि॰
लो॰
१२५

१२४

नामविलिख्य तस्याद्विकारेणुत्तमिति विलिख्य कोणपत्रेषु सः
इतिविलिखित्वा वहिश्चतुरस्रं कृत्वा तस्याद्वित्तवकोणेषु टं इ
तिविलिखित्वानक वहिर्भूपुराङ्कं फट् भवति अथाघोरास्त्रमंत्रः
तत्र श्रीकंठसंहितायां अथाघोरमंत्रं वक्ष्ये सर्वशत्रुनिषूदनं
सर्वदुष्टग्रहव्याधिनाशनं जगदीश्वरि रेवतीनकुलाक्रांतालो
लालीश्रीभवीयुताः भृगुक्रांताक्रंदनीवचरयुग्मग्रहवत्
क्रोधीशोनकुलीशाख्ययुतेरेवहृदयं शिवे वर्मद्वयं वेदयुग्मं घात
यद्वितयं ततः वर्मास्त्रान्तो मन्त्र ईदृग्विप्रकंपं वदशाक्षरः इतिरेवती
रेवनकुलाक्रांताहकाराधःस्थिता लोलोलीईकारः श्रीभवी
विंदुः नाभ्यायुक्ता· तेनह्रीं इति भृगुः सकारः नकुलाक्रांताः क्रंदि
नी· तदस्यफकारः वर्तेलाली· उकारेणयुता तेनस्फु इति रेव
नीरेफः युतमनेनहृदयं स्फुर· इतिआदिचतद्वयं स्फुर इति अस्त्र
हृदयं आकाराहि· वकाराहीशालभ्यते तेनस्फुरस्फुर इतिशिवोत
मोपकारः सद्यःमेकारः तद्युक्तेनघोइति रेवतीरेफः युनःत
हृदयंघोरइतिनाथइतिमयंरूप तनुरूपंचटः युग्मेचट इतिपात
यः द्वितयंपातइतिवर्मणंमत्र अस्त्रफट् तथा अघोरास्त्रस्य ऋषिः
प्रोक्तस्त्रिष्टुप्छंदः समीरितं अघोररुद्रोदेवतास्याह्रंबीजंदेवि
कीर्तितं शक्तिश्चशक्तिजेस्थानस्तुफट्पार्थेचतद्धृदि विनियोगो
भवेदेविषडंगोविन्यसेगतः शारंतेदशाद्यिंतिदिवाकरमि
नेक्रमात् यद्यतेकादशमतोरेणुस्यानेषुविन्यसेत् कंठेत्र
वकगलद्वात्रांस्येमहृन्नाभेगुत्त सतेचापादयोश्चैवपदानिपर्य
पदानिस्वमैरेषुवि इतिषडंगन्यासेवर्णोविभेगमाहापारद्वस्य
दि शाखाः ५ अस्तव ६ दिक्षु १० नेत्रिन ४ दिव्यकराः १२

पदेषु वर्णविभागमाह शराः ५ ऋतवः ६ नेत्रे २ वसवः ८
ग्रहाश्च ४ रसाः ६ वेदाः ४ तथा एवं मूलमंत्रं मंत्री ध्यायेद्देवेश
सन्नधीः कालमेघनिभं देवं भीमं दंष्ट्रं त्रिलोचनं भुजंगभूषणं रक्त
वसनालेपलोभितं परशुं करवालं च बाणं त्रिशिखमेव च दधा
नं दक्षिणैर्हस्तैरूर्ध्वादिक्रमतः परैः डमरुं खेटकं चापं तर्कपालं च
पार्वति कार्मुकमेसरत्नाभमस्मितं वारके निग्रहे च रक्षणादिषु
कैलेन्द्रकानिभं स्मरेत् एवं संचिंत्य देवेशं शैवपीठे षडोदिते षट्
कोणांतःस्थिते पद्मे हृदि जये भूषिते रहते चतुर्द्वारसमायुक्ते वसुपत्रे
महेश्वरि पूजयेद्देवमावाह्य गंधपुष्पैर्मनोहरैः अंगानि पूर्ववत्सा
धके केसरेषु यथाक्रमा प्रथमोष्टदले देवि पूजयेदायुधाष्टक
परशुं डमरुं खड्गं खेटं बाणान्धनुस्तथा मूलेकपालं चैतानि द्विती
येष्टदलेषु नः ब्राह्म्याद्या मातरः पूज्या अनंतरस्तत्रयोनरा वीथीका
हृष्टलोकपालांस्तदस्त्राणि च पूजयेत् । प्रयोगः । तत्र प्राग्व
त्यासः क्रमादियोगपीठन्यासांते प्राणायामत्रयं कृत्वा शिरसि अ
घोराय ऋषये नमः गुह्ये हूं बीजाय नमः पादयोः ह्रीं शक्तये नमः
इति विन्यस्य मम चतुर्विधपुरुषार्थसिद्धये विनियोगः ततः कृता
ञ्जलिर्वदेत् ततः ह्रीं स्फुर २ नमः मुखे प्रस्फुर २ नमः शिरसि घो
र घोरतर तनुरूप शिखायै॰ चट चट प्रचट प्रचट कह कवचाय हुं कह
कह वम वम नेत्राय वध वध घातय घातय हुं फट् अस्त्राय फट् २
नि षडंगमंत्रान् अंगुष्ठादितलांतं करयोर्विन्यस्य हृदयादि षडंग प्र
पि विन्यस्य शिरसि ॐ ह्रीं स्फुर २ नमः मुखे प्रस्फुर २ नेत्रयोः घ
न तनुरूप हृदि चट चट नाभौ प्रचट २ लिंगे कह २ ऊर्वोः वम २ जा
न्वोः बंध २ जंघयोः घातय पादयोः हुं फट् नमः इति विन्यस्य ध्या
नादि षडंगपूजांते प्रथमाष्टदलेषु वामादिमारभ्य प्रादक्षिण्येन

वि॰
ली॰
९२५

925

पराशवेनमः डमरुकायखट्वाङ्गायखेटकायबाणेभ्योशूलायक
पालाय इतिसंपूज्य द्वितीयाष्टदले देवाग्रमारभ्यब्राह्म्याद्यष्ट
मातृकासंपूज्य प्राग्वदिंद्रादिदिक्पालानारभ्यमासर्वंसमापयेदि
ति तथा लतमाःश्रजपेन्मंत्रं हविष्याशीयत ततः जुहुयात्दशां
शेनतिलैः श्रुदेहैतलतैः तर्पणंमार्जनंकृत्वाभोजयेन्मधुरोहि
जान् पंचभिर्द्दैमत्रवैरकाम्यकर्मणिमापयेत् क्रमात्सर्पिरसा
मार्गीतिलसर्षपपायसैः षंगासैः सहस्रंप्रत्येकंयामिनीस्वाजुहुया
त्सुधीः होमोयंनाशयेत्सर्वघोरभूतकृत्यामयादिकान् घृतकिंशु
कनिर्गुंडीहोमायामार्गीसंभवे समिद्वरैः कृतोहोमः सर्वदुरि
शान्तिदः अपामार्गपवपत्रैः पंचगव्यसमुत्थिताः समिधोजुहु
यात्कस्यपंचगव्यानिनिशिस्थितः घृतसहस्रहोमेनभूतोनाति
यहोमवैतन् क्रमात्सर्पिरपामार्गपंचगव्यहविर्हुतैः हुत्वासहु
संप्रत्येकंपात्रेसंपातयेद्धुते संपातसर्पिषासाध्यंभोजयेन्नतशो
नये लिखेद्दष्टदलपद्मं वह्निगेहद्वयांतरे मायांतककर्णिकामा
धेसाध्याख्यकर्मसंयुते स्वरैरावेष्ट्यतत्पार्श्वे किंजल्केषष्ठवर्गता
न् ककारादिलकारांतानालिख्य दलसप्तके प्रथमेवदलेवाधि
तोतान्समालिखेत् स्फारादिवदग्रमांतान्मंत्रवर्णान्लिखि शः
लमध्येतत्संलिख्य दलाग्रेषुमहेस्मृती प्रवराघोगानयोनानये
वरुणेपोलिखेत् बहिःषट्कोणकोणेषु प्रतिलोमस्समालि
न् वर्मास्त्रबीजेन तद्दारयेत् भूपुरेणान्वेष्टयेत् दीक्षोक्तविधिनाकुंभे
क्षिप्त्वेनिधापच तत्रैवदेवसमाराध्य तज्जलैरभिषेचयेत् मूलना
स्मारकमाघोमवैनरपद्यप्रदवाः। अथमर्थः। कश्चिद्भूतले
मेस्मिंहस्तादिनाविपुलंषट्कोणंविरच्य तन्मध्येषट्दलंपद्मं
तत्कर्णिकायांशक्तिबीजमालिख्य तस्यहकारादेरेवदत्तस्य

रेफस्थाने रोगी ईकारस्थाने नामायनामायेति साध्यकर्माणालि
खेत् ह्रींजसविंदुभिः षोडशस्वरैरावेष्ट्याष्टदलकेसरेषु प्रथ
मदलकेसरे कंखंगंघं चंछंजंझं तृतीये ञंटंठंडंढंणं पं
चमे थंदंधं षष्ठे पंफंबंभं सप्तमे मंयंरंलं अष्टमे वंशंषंसंहंलं
क्षं इति स्वार्थैरवोरतषष्ठेष्टरनन्तसप्तमेत्रूपवश्राष्टमेदचर इ
तिविलिख्य ततः प्रथमदलाग्रेषु अचर द्वितीयेषु चर तृती
येकरहकह चतुर्थेहमम पंचमेवमवम षष्ठेवयवय सप्तमे
यानय इति विलिख्य तद्बहिः षट्कोणेषु फट्कोणेषु ॐफ
ट् इति प्रतिकोणं विलिख्य तद्बहिश्चतुरस्रेणावेष्टयित्वा तत्र
दीक्षोक्तविधिना कुंभे संस्थाप्य तत्र देवमावाह्य समभ्यर्च्य तेन।
जलेन साध्यमभिषिंचयेत् फलसिद्धिर्भवति तथा अष्टपत्रे लि
खित्वा मध्ये षट्कोणं तस्य मध्यतः तन्मध्ये शक्तिमालिख्य साध्या।
ख्यानेन सम्पुटं स्मरहृदये ततो शक्तिं वेष्टयेज्जगदीश्वरी षट्को
णस्थानकोणेषु प्रस्फुरहृदयं लिखेत् एकैकशो महेशानि पि
ष्टवर्णान्तलेखया मूलमंत्रस्य देवेशि रसवेदचतुरस्रैः चतुष्ट
त्वैंदरसैर्विभक्तान्तद्बहिस्ततः पुनः षट्कोणमालिख्य तत्को
णेषु महेश्वरी ह्रंफडित्यालिखेद्बाह्ये चतुरस्रेणावेष्टयेत् यंत्रमेत
दघोरस्य कीर्तिं विंडविडहीभे हृद्वोरग्रहफलभूतापस्मारना
शानं ससाधितेच तैत्रणां सर्वसिद्धिप्रदायकं अस्याविपुलषट्
कोणं कृत्वा तन्मध्ये अष्टदलपद्मं विरच्य तत्कर्णिकायां पुनः षट्
कोणमालिख्य तन्मध्ये प्राग्वत्साध्यं शक्तिमालिख्य तां स्मरद्व
स्वरवत्तछायेरावेष्ट्य ततः षट्कोणेषु प्रस्फुरहृदिति षट्स्वराणि
प्रतिकोणमेकैकमालिख्याष्टदलेषु स्वाग्रदलमारभ्य प्राद। ९४४ ९४४ ९ इति
लिपेन घोरइत्यादि यानयरसेनान्वर्णेन

वि॰
टी॰
९२६

926

क्रमेणविभज्यालिख्य बहिःषट्कोणशुभ्रामवदोमातरद्धयंवि
लिखेत् तद्बहिश्चतुरस्रेणवेष्टयेदेतद्यंत्रंशुभफलदंभवतीति
श्रीशिवरहस्ये। अथवक्ष्येमहेशानेमंत्रंपाशुपताह्वयं अस्त्रराजं
समस्तायतनारकंशत्रुकृंतनं तारोवकेशःशांतीन्दुभूषितंचेद्दशो
खरः शिखीशशर्वौदांतश्चपंचमस्वरसंयुतं वर्गान्त्यातषडर्णोयथ
उग्नेनसमीरनः तारःप्रणवः वकेशःशकारः शांतिःईकारः इन्दो
लकारः नाम्नाभूषितःचेद्दशेखरः बिंदुःसमल्लकः तेनश्री १
निशिखीशः पूर्वःपकारः दांतःशकारः पंचमस्वराःउकारः त
ग्रकःतेनशुशक्तिबीजं अस्त्रफट् तथा। ऋषिःस्याद्ब्रह्मदेवोस्य
पंक्तिछंदःउदीरितं रुद्रःपशुपतिःप्रोक्तोदेवतादेववंदितः मंत्रा
र्णैःषड्भिरंगानिफडंतैःसबिंदुभिः जातियुक्तानिविन्यस्यषडंगान्
नेत्रांगयोः ध्यायेत्पशुपतिंसम्यग्मंत्रीचैकाग्रमानसः पंचवक्त्रं
दशभुजंप्रतिवक्त्रंत्रिलोचनं अग्निज्वालानिभश्मश्रुभीमदंष्ट्रंभया
नकं खड्गबाणानंतसूत्रशक्तिपरशुमेवच दधानंदक्षिणैर्हस्तैर
हीरिकमनोज्ञंकं खेटवाणांकुशडिंडिकांचत्रिशूलंचखट्वांगं डमरुं वामा
हस्तेनविषाणमथपात्रांकपालंशुभं नानाभरणसंदीप्तपन्नगैर्द्रैर
लहस्ते स्फटिकोपमनिभंकांतं सर्वरत्नाकरं स्मरेत् एवंविधंबजय
दीप्तं शीर्षांगाद्याविभिः शिवं पद्ममष्टदलं कृत्वा कर्णिकाकेसरावि
न वनहारंसमाशुकं चत्ररस्त्रयाहते पूवंयंत्रंसमालिख्य स्वर्ण
मौण्यादिकेशुभे पटेवाफलकेवस्मश्रीके दाडिमसंभवेन् सर्वा
पवौरगाद्यपयमेद्गानिखेवितन् दलेषुमानरःस्याल्लोकेषरा
स्ताविनहरिः एतेयहियिनानेन रुद्रैःपरमभक्तितः यःसमर्वा
नवाधारकामानेनेशिवोभवेत्। अथप्रयोगाः। तत्रप्राग्वन्न्यासतः
कन्यादियोगपीठन्यासांते मूलेनप्राणायामत्रयंकृत्वा शिरसि

वामदेवऋषये नमः मुखे पंक्तिछंदसे नमः हृदये पशुपतये देव
तायै नमः इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः इति कृ
तांजलिर्वदेत् ॐ ह्रूं फट् हृदयाय नमः ह्रीं ऊं फट् शिरसि स्वाहा प
ं शिखायै वषट् ग्लूं ऊं फट् कवचाय हुं ऊं ह्रूं फट् नेत्रत्रयाय वौषट् ऊं फट्
अस्त्राय फट् इति षडंगमंत्रानंगुष्ठादितलांतकरयोर्विन्यस्य हृदया
दिषडंगेष्वपि न्यसेत् ततो ध्यात्वा गंधजां तेदष्टदले शुभ्राल्माघाः से
रक्त वह्निर्वीयीहृदये इंद्राद्यास्तदस्त्राणि च सेरक्त प्राग्वत्सर्वं समा
पयेदिति तथा वर्णलक्षजपेन्मंत्री हविष्याशी जितेंद्रियः तद्दशा
शहुतेर्द्रव्यैः संस्कृतेनलैः तर्पणं मार्जनं कृत्वा ब्राह्मणान्भोज
येत्सुतः ततः सिद्धमनुर्मंत्री प्रयोगान्विदधीत वै। अनेन मंत्रितं
तोयं यस्तस्य वदने क्षिपेत् सद्यस्तं रवितिक्तं दन्तग्रहोमेत्र प्रमाद
तः अमनान्मंत्रितान्वाणानिरस्येत्प्रति भूपतिः जपेल्लक्षेण सव
लानपि शत्रून्षडाननः। अथ श्रीकंठसंहितायां। नीलकंठम
नुवक्ष्ये सेंद्रजाय विनाशनं यज्ञात्वा यरिजेमंत्री दृष्टानाशयेत वि
षं भुजंगेशुसमारूढो लोहितेशकपार्दिति सद्यात्तरसमा शुकोे
शश्यमेव रवर्णिनि मेषशोपि भुजंगस्यो लोलाक्षी श्रीमुखेंदुनः
लांगलीशामहासेन शुजस्तातीयईरितः भुजंगेपोरेफः तत्रुप
रिस्थितो लोहितेशः पकारः सद्यः ओंकारः स्वकूरोविंदुः ताभ्यां
युक्तः तेन प्रों इति मेषेशो नकारः भुजंगस्यारेफोपरिस्थितः लो
लाक्षी ईकारः श्रीमुखो विंदुः ताभ्यां युतः तेन टः इति तथा अ
स्योमुनिः हरिषोनुष्टुप्छंदश्च देवताः नीलकंठः शिवो देवी।
षडंगविधिरुच्यते ह्रायुग्महृदिंगतेल्तन् कपर्दीहृदः शिरः नी
लकंठाय सद्. देवीस्वाहांतश्च शिखामताः कवचं कालकूटांतेवि
षभक्षणाय स्यंतं तमास्ताबीजयुगलं नीलकंठः सद्. शिरः प्र

वि॰
णी॰
४२७
427

सैमेवंयजेद्देविपंचांगानिकरांगयोः मूर्द्धिकंठेचहृदयेन्यसेद्दी
मंत्रयेततः ध्यायेद्देवंनीलकंठंबालार्कयुगवर्चसं जटाजूटल
सचंद्रसकलेफणिमन्नमैः कृतांकुल्पकरांभोजैर्दधानंजपमा
लिकां मूलंचदक्षिणेपाणौवामाद्दैचकपालकं खट्वांगंतदधो
हस्तेपंचवक्त्रविराजितं प्रतिवक्त्रंत्रिनयनंव्याघ्रचर्मांवराहृतं
पद्ममध्येसमासीनंमतिसुंदरविग्रहं एवंध्यात्वार्चयेत्पीठेशैवे
सर्वोपचारकैः पद्मेवसुदलेरम्येचतुरस्रत्रयाहृतेः वसुहारस।
मातृकेएवमंगानिसंजयेत् लोकेस्वार्थान्थेभ्यर्च्येनदस्ताणि
वंसंजपेत् एवंसमर्चयेन्मंत्रीनीलकंठंमहेश्वरं इष्टाविनाश
येत्तंनीलकंठंस्वापरः। अथप्रयोगः। अथप्राग्वत्प्रातःकृ
मादियोगपीठन्यासांतेमूलेनप्राणायामत्रयंकृत्वा शिरसि अ
कृणायऋषयेनमः मुखेत्रिष्टुप्छंदसेनमः हृदये श्रीनीलकंठा
यदेवतायेनमः इतिविन्यस्य ममसर्वाभीष्टसिद्धयेविनियोगः
इतिकृतांजलिर्वदेत् ततोमूलेनकरशुद्धिंकृत्वा हुंहुंस्वाहा
हृदयायनमः कपर्दिनेस्वाहाशिरसेस्वाहा नीलकंठायस्वा
हाशिखायैवषट् कालकूटभक्षणायस्वाहाकवचायहुं फट्क
वचोनीलकंठिनेस्वाहाअस्त्रायफट् इतिपंचांगमंत्रान्गुष्ठादि
कनिष्ठांतंकरयोर्विन्यस्य नेत्रवर्ज्यंहृदयादिपंचांगेष्वपिन्यसे
त्ततः प्राग्वत्सर्वंसमापयेदिति तथा लक्षत्रयंजपेद्देवि दी
सितोविजितेंद्रियः हविष्याशीहितेनाथहूनेद्देविदशांशतः त
पंचमानेनकृत्वाभोजयेन्मधुरैर्द्विजान् एवंसिद्धमनोदेवीमं
श्रीहरतिमंत्राणात् तेउक्त्रयंनमंदेहानीलकंठस्वरूपिणे
दिक्षयसंततस्त्राणात्रिविषोभवेत् त्रिलोकीविषणमंत्रीप्रजपेत्स
समाहितः विषहत्यानुध्यानेसाववीराग्रामेसमेशयः मंत्रात्वहं

वक्ष्याम्यहं ग्रहग्रस्तस्य शिरः कंठहृन्मूलव मंत्रवर्णत्रयं यस्य देवताऽऽ
पकं गुह्यं स्मरन्स्मरद्विनाणामामामध्यमातर्जनीपदः मंत्रात्क्षरहयं।
देवीजटदेशलिभिर्हननमः विपूलत्रमायायास्मरामपन्नलवनाश
येत् पंचाशन्मत्रनाजप्तमंत्रमौषधमेवच भक्तितस्तेऽरोगादिना
शमं परमशिवे मंत्रान् स्मरेवावदेनीलकंठस्य पार्वती नारह्नी
लकंठायमत्ररक्षात्तरोभवेत् नारः प्रणवः हृन्नमः शहः नीलकंठा
यस्वाहा। तथा ऋषिर्ब्रह्मास्य प्रहिहोगायत्रीछंदउच्यते देवता।
नीलकंठोस्य विषग्रहविनाशनः ग्रंमध्यानाद्येनाजाप्यहोमार्पण
यथोक्तवत् नोरुद्रे नीलकंठाग्निवक्षरक्षापिकोपरः नारः प्रणवः ऽ.
नीलकंठो नीलकंठव्यायः इति अग्निवक्षः स्वाहाकारः स्वाहावैवह
दैतैः स्तुः पंचांगानि समेत्क्रमात् दहनतर्जनिकारं भावामतर्जनि
वपिः वर्णाष्टकन्यसेन्मंत्री पादौ कण्ठशुद्धनाभिषु हृत्कंठमुखशीर्षे
षु मसेद्वर्णाष्टकं प्रियं एवोद्धेनतनीमुक्ति खेनपीताकर्णास्तिना
खिनैः अभयवरदं चापं वासुकिं चदधडजे येयोदेवस्तमपार्श्वस्यगो
रांगस्थानि सिंदरः सेहारनिर्विषत्वं भावेशात्कमाडयेः दक्षिणाधः
करमारभ्य वामाधः करपर्यंतं आयुधध्यानं तथा अत्तरोक्तविधा
नेनप्रजयेत्परमेश्वरं पुरश्चरणमष्टकं वर्णलक्षं महेश्वरि। प्रयम
योगः। तत्रप्राग्वद्योगपीठन्यासांते प्राणायामत्रयंकृत्वा एवंक
शिरसि ब्रह्मणायऋषयेनमः मुखेगायत्रीछंदसेनमः हृदये श्री
नीलकंठायदेवतायैनमः इति विन्यस्य ममसर्वाभीष्टसिद्धयेवि
नियोगः इतिकृतांजलिर्वदेत् ततोमूलमंत्रेणकरशोधनंकृत्वा
नीलकंठाय हृदयायनमः स्वाहाशिरसि ॐनमः शिखायैवषट्
नीलकंठायनमः कवचायहुं स्वाहानमः अस्त्रायफट् इति पंचाग
मंत्रांगुष्ठादिकनिष्ठांतं कार्योविन्यासस्तेनैव ॐ हृदयादिष्वपि।

चि॰
णि॰
१२८
128

मेत् ततोकस्मुंगं ध्यानाम्नस्सर्वेषमलरवक्तुर्यादिति । अथ चिंताम
णिमंत्रः तत्रादौ श्रीशिवरहस्ये । कैलासशिखरेरम्ये नानारत्नविचि
त्रिते नानाद्रुमलताकीर्णे मंदवायुतरंगिते नानाकुसुमसौरभ्ये
णामोदितदिगंतरे सिद्धकिन्नरगंधर्वचारणाप्सरसांगणैः गीतवा
दित्रनृत्यैश्च पाणिपद्मैः शिवं सदा ब्रह्मविष्णुमहेन्द्राद्यैस्तुवद्भिरमरै
स्तथा गंगास्नानेद्रिंगाधैर्गणैस्तु निगणैरपि निषेवितेशिलापृष्ठे
वैडूर्यमणिनिर्मिते सिंहासनसमासीनमर्धनारीश्वरं हरं सुख
सन्नमुखशंभुस्कंदः प्रच्छशंकरं । स्कंदउवाच । भगवन्सर्वधर्मज्ञ
जगदाद्यजगत्पते अनाद्यमखिलेशस्त्वामथविग्रहाः रहस्यं किं
चिदिच्छामि देहेतोभक्तवत्सल भक्तोस्मि तव देवेश वदस्वकिय
याविभो चिंतामणिमंत्रवैदम्भूविनेयस्त्वयाश्रुतः इदानीतं जग
त्रायश्रोतुमिच्छामिशंकरः । श्रीमहादेवउवाच । साधुसाधुग्रह
पानसर्वेजगत्पारगः रहस्यमपिवक्ष्यामि भक्तोस्मीतिषडाननः
नकस्यापिमयाख्यातंतवस्नेहाद्वदाम्यहं गोपितंत्वयासदायाव
तेनप्रकाशयषडाननः मद्भक्तायसंध्यानायसत्कुलीनायते ::
मंत्रोद्धारंप्रवक्ष्यामि शृणुवत्ससमाहितः भृगुर्गेशसमुद्धृत्यक्रो
धीशेनदयःकुरु स्वेतेशानमथःकुर्यान्महाकालवषएवः ततः
मंचिंतयेदेवंशिवंबिंदुमारकवामाहे नीलायरागकः अथहिंग
गाशाधाकाहेविलसज्जगन्मौलिक हावभावविलासाढ्यैर्नारीष
रमेहृष्टं भीषणायरवेहाईवामोर्द्धेपाशमङ्कुशं पंचवक्त्रंदधी
रुसेदधानंवतिष्णोडके करौत्रिशूलंनस्याधोऽटकपालंवबएा
त्वः श्रविभक्ताष्टकोकलमालालेपविसर्जने पंचध्यात्वायते
देवीवेमर्मोपचारकैः अष्टपत्रोड्डनहदवनरमस्त्रयंततः वंतु
रसमोपेतमस्मिषाम्यखहजयेन आशांबगानिमेसहस्रकेसरे पु

यथाविधिः अर्चयेद्दष्टपत्रेषु कार्त्तिकेयहषदिकान् ब्राह्म्या
द्याः मातरः पूज्या द्वितीयेष्टदलेषु तु नः लोकेशान् लवतान्यायुधा
न्वीथ्यां हृदि यजेत इति । अथ प्रयोगः । तत्र प्राणायोगपीठमा
सीनो मूलेन प्राणायामत्रयं कृत्वा शिरसि कश्यपाय ऋषये नमः
मुखे अनुष्टुप्छन्दसे नमः हृदये श्रीअर्धनारीश्वरो देवतायै
नमः गुह्ये ह्रीं बीजाय नमः पादयोः स्वाहा शक्तये नमः नाभौ मं कील
काय नमः इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः
इति कृताञ्जलिर्वदेत् ततः ऐं हृदयाय नमः क्लीं शिरसि स्वाहा
सौः शिखायै वषट् ऐं कवचाय हुं क्लीं नेत्रत्रयाय वौषट् सौः अस्त्राय फ
ट् इति षडङ्गमन्त्रेण अङ्गुष्ठादितलान्तं करयोर्विन्यस्य हृदयादि
न्यासेषु पञ्चमन्त्रान्विन्यस्य मूलमन्त्रेण तालत्रयं दशदिग्बन्धनं कृत्वा
ध्यानादिं पञ्चोपचारान् अष्टदलकेसरेषु आग्नेये ऐं हृदयाय नमः
नैरृत्ये क्लीं शिरसे नमः ईशाने सौः शिरसि स्वाहा नैरृते ऐं शिखा
यै नमः वायव्ये कवचाय नमः देवाग्रे नेत्राय नमः देवा
ग्रदिक्चतुर्दिक्षु अस्त्राय नमः इति षडङ्गानि संपूज्य प्रथमाष्ट
दले देवाग्रमारभ्य प्रागादिदिक्षु नन्दिने महाकालाय क्षेत्रपालाय वृषेश्वरा
य भृङ्गिणे षण्मुखाय नन्दिने विघ्ननायकाय सेनापतये इति
संपूज्य द्वितीयाष्टदले तथैवारभ्य ब्राह्म्यै माहेश्वर्यै कौ
मार्यै वैष्णव्यै वाराह्यै ऐन्द्र्यै चामुण्डायै महा
लक्ष्म्यै । इति संपूज्य इन्द्रादिसर्वं प्राग्वत्समापयेदिति तथा
एकलक्षं जपेन्मन्त्री जितेन्द्रियः कुर्यात्तद्दशांशेन
त्रिमधुकैः सतण्डुलैः तिलैः सन्तर्पयेद्देवं शुद्धतोयेन वा ततः त
तो अभिषिञ्चेन्मूलेन स्वमूर्द्धनि समाहितः ब्राह्मणांस्तोषयेत्पश्चादन्न
पानैः सदक्षिणैः एवं सिद्धमन्त्रस्तु प्रयोगान्विदधीत वै ।

वि॰
ली॰
२२८

९२९

इति पंचलक्षजपः कृताः पुरश्चरणाः शिवमन्त्रावेत् शिवशक्त्योः
पृथक्पृथक्ध्यानमनुक्तं यथा अथवा देवदेवेशि ध्यायेदष्टभुजं
शिवं दक्षिणोर्द्धकोटेर्विपार्श्वतस्त्रयः क्रमात् खड्गपाणिं शरांश्चै
व दधानं वामबाहुभिः भुजंगं त्रिशिखं चैव कपालं चापमेव च
कुठारं दितस्त्रीविलासं संस्थीतं तरुणास्त्रिदशार्चिता गंगातरंगविलस
खेटकं च जटादिशेखरं इति संचिंतयेद्देवेशं तमाश्वेस्य शिवामपि पूर्व
णामहणाकलामहणांघकधारिणी अरुणातोयमालाप्यांचित्रे
रामणिभूषितां शूलैः षोडशभिर्युक्तभुजषोडशमंडितां चिंतयेत्सु
रेशानीं साधकाभिष्टदायिनी इति प्रायशः काम्यमेतिदेति चिंत
निसंत्वप्रागुक्तमेव। शिवरहस्ये। रेफस्य कादिसंवत्स शिवशक्ति
निषेधश्च प्रजपेन्नोत सिद्धिः स्यात्कुष्ठी त्वमेव न संशयः। अयमर्थः
बीजस्यादिमे रेफमफस्य तस्यानेशिवशक्ती हकारसकारौ संयो।
जपेदिति शमादांघजपेन्मंत्रं अयुतं मंत्रवित्तमः तेनावेशो
भवेन्मध्ये भूतादीनां कृतामपि एतस्य शिरसि ध्यायेत्तु इन्दुमंडलम
ध्यग स्वरैः षोडशभिर्बीजं एतस्य शिरसि स्मरेत् बीजमेतन्महा
मंत्रहानितत्वणाहेन त्रिकोणं चिंतयेन्मूर्ध्नि एतज्जंतो षडाननः
तन्मध्ये चिंतयेद्बीजं ज्वलत्कालानलप्रभं त्वणादाचेन्महामंत्री अह
भोगादिकानपि एतन्मंत्राभिजनमेव वृभजीवप्रसनके एतस्य मू
हंति तिमंत्रणादावेशकारकं पौष्टिकशांतिकं मंत्रं गुह्यं वर्णेवि
चिन्त्य च सकारमादौ संयोज्य जपेन्मंत्रं षडाननः प्राकृष्टो वव पीका
वीरकौरकादिकोभवेत् हकारादिस्वरैर्मामं लभते लोभणात्रहः
पश्रवर्णौ पकारादि विदिक्षोच्चारयोरपि पीतवर्णौ लकारादिमं
नशिरिवबाहने शुद्धस्फटिकसंकाशं संज्ञोयेयो शुक्लाभिः अ
कारादिस्वनमध्ये दिशाकोदशानो गदः वायुमंडलमध्यास्थ मंत्रं

हसं विचिंतयेत् नेत्रयोर्द्विषतां वश्यं ग्राह्यमाशु प्रजायते वाधिर्य
कर्णयोरंध्रकं द्विवदने स्मृतः ॐ ह्सौ मूले कर्णमाशु वा शुभं भस्म संस्कृ
ते ठः संहृत्व शिरोरोगं ज्वर्याच्छिरसि षण्मुखं वाथायं कंठतालेच व
ते रक्तस्य मध्यगे चंद्रमंडलमध्यस्थं स्वरैः षोडशभिर्वृतः नेत्रध्याने न
नेत्ररोगं हरत्याशु न संशयः एकस्तानेकशांगीकां योगो ध्यानं हरेत्तथा
ते ॐ ह्सौ ध्यानं शूलकस्याद्विस्फोटे विषमे ज्वरे त्रिविधं कामयेवमत्र
मेरावहे शिरोग्रे स्मरेन्मंत्रवित् माभंतत्र तदोषशांतये प्रस्तारके शिखां
ते स्थितं बीजं स्मरेत् ग्रहाः यस्य ग्रह्णं विषं पश्यादविवादमवद्रवः स्त्री
गनाल्दं भो स्थितं मंत्रविचिंत्यच मंत्रवर्णैः ह्फवधा तेजोरूपाचम
स्मरेत् तच्छीर्षमाशु पाशेन कर्षयोयोषितां शुव स्वानामगर्भितं वी
जं योषायोनौ विचिंतयेत् वशायोत तत्क्षणाद्योषा श्रावयेच्छुक्रमेवच
निजलिंगशरीरस्थं तद्बीजं चिंतयेच्छुक प्रवेशाय योनिमध्ये स्वपकायो
चिंतावशेन विद्ध्याद्वश्यं एवनात्र कार्या विचारणा ॐ लालप्रुड
मानीयतत्र बीजं समालिखेत् तन्मकारस्य रेफेन साध्याख्याकर्मसं
युक्ता विलिख्येत त्रिकोणेन वेष्टयेत् हृत्तथा षट्कोणेन समावे
त्य षट्कोणे चालिखेत् रेफं सबिंदुकं तच्च विलोमे वेष्टयेत्स्वरैः
प्राणप्रतिष्ठां तस्याः कृत्वा सम्यक् खड्गाननः निखनेत् वत्सयाश्च तत्रयो
कं समाचरेत् तदंत्रं भक्षणात्सद्यो वश्यो भवति निश्चितं पतिस्त्रिया
याषट्वक्रे नात्र कार्या विचारणा मधुरत्रयसंयुक्तेन शालिपिष्टेन षण्मु
खे कृत्वा पुत्तलिकां सम्यक् प्राणगोमिति मंत्रलो प्रपदाभ्यां च जंघा
भ्यां जानुभ्यामूरुयुग्मतः नाभेर्वक्षस्याहृदयात्कंठाद्वाशीर्षकेन
तः एवं द्वादशधा च्छित्वा नीत्वा गृहां स्वेन साधकः मूलमंत्रेण जुहुया
च्चतुर्दिक्षु खड्गाननः सवश्यो भवति क्षिप्रं नात्र कार्या विचारणा व
नरसंयमं कृत्वा नानवालीदलेग्रहाः तन्मध्ये वकारस्य बीजमाध्य

वि॰
लं॰
१२॰

९३०

समालिखेत् मंत्रमध्यमकारायः स्थितेरेफेविवर्तनः चतुरस्रेवत
कोणेसकारंविंदुसंयुतं विलिख्यध्यानत्स्राणमूलमंत्राभिमंत्रितं
भ्रष्टोनरसहस्रेणशिरोरोगीप्रभक्षयेत् ग्रंथिकेयाचिरोदेवीरोगान्
मुक्तःसुखीभवेत् मेरुकेणककारेणकंठसाध्यस्यषण्मुखः दन्तस्रं
षकोणेवामंचैवमकारतः दंताशोरेफतोऽधावामेचापिपकारकः
श्रीकोणेसुखवत्सनाभिमूकारतोऽगुरू वंतोविंदुदेचेद्रांभोवधाक
णेरेदिया सुवंशांतेसवशास्यदविशानसंशयः वेष्टजीवाख्यमुष्य
णत्रिकोणरवयेत्गुरु तन्मध्येविलिखेद्रीमंचेदनागरुकुंकुमैः पुष्येण
चन्द्रतः मनेदष्टोनरशांतेचैतैःसंपातयेद्भुतं त्रिलोहनिर्मितायांतस्य
द्धिकायांविचक्षणः संपातसिक्तांतावन्मसहस्रेणाभिमंत्रितं माष्टु।
लानिहन् विषवेतालभूतादिडाकिनीवांदितेनमः वहेभागत्रिलोह
णपूर्णमाष्ठमुखसांप्रतं सोमसूर्याग्निरूपत्वान्मात्रकायाः षडाननः
तन्मध्यत्रिलोहस्यभागास्तहरीसंख्यया भवेद्रूपास्यसोम्यत्वाद्रा
गःषोडशकथ्यते कांचनस्यार्कस्वपत्वात्तद्गुणाःपंचविंशति तेनभाग
लस्यताःवसुसाग्निमयत्वतः तद्गुणाष्टदशैतेनतन्मभागोपितादृशः
श्रष्टपत्रंलिखेत्सप्तकोणिकायांषडस्रकं तन्मध्येवत्रिकोणंस्यात्तन्म
ध्येवीजमालिखेत् साध्याख्याकर्मसंयुक्तं षट्कोणेषुषडंगकं लिखि
तस्याद्रिपत्रेषुवीजवर्णान्विभज्यच रेकंथसंयमितिचषण्मुखा।
स्यवहिर्हेतवत्तस्कंस्याद्नरालत्रयान्विते एतद्यंत्रघृतंसर्वरत्नाक
रमनुत्तमं अग्निमंत्रंसमाधायकलशेविधिवद्गुरुः तत्रदेवंसमभ्य
र्च्यसाध्येनानाभिषेचयेत् गहरोगादिभिर्मुक्तः सुचिरंसुखमाप्नुया
त् ग्रीवायाबहुकोणमालिख्यचकारंतत्रसंलिखेत् तन्मध्येसाध्यंसंयु

केलिखेद्बीजं षडाननः स्हौः षोडशभिर्बीजं षण्मुखेभ्यः समालि
खेत् ककारादिक्षकारान्तान्वर्णान् बिंदुसमन्वितान् अष्टकोणेषु।
हिः कृत्वा तत्कोणेषु लिखेत् हूं नृसिंहबीजं प्राग्कोणे पञ्चमे तत्तत्षड
ननः इष्टग्रह विषव्याघ्रिनाशने सर्वसिद्धिदे आदौ षट्कोणमा।
लिख्य तन्मध्ये साध्यसंयुतं चिंतामणिं समालिख्य षट्सु कोणे
षु षण्मुखं रं कं ठं मं रं यमिति ओम् इति वसोर्यथा विलिख्य वहि
रो वेष्टयेत्तेन षणवेन च तद्बहिर्वै षयेढस्य पुनर्वृत्तं समालिखेत्
तद्बहिस्तत्त्वरसेणवेष्टयित्वा विचक्षण नृसिंहबीजं विलिखेत्तत्को
णेषु च षण्मुखः एतद्यंत्रं रोचनया विलिखेद्धोमयोगतः लाक्षादि
नेमयं कृत्वा संजप्य विधिवद्बुधः मस्तके धारयेद्येन लक्ष्मीसौभा।
ग्यवर्धनं व्याधुरोगविजयं वश्यकृन्मंत्रपीठदं चौरव्यालमहारो
गभूतापस्मारनाशनं कारकं तरोश्याखोमा ग्राममानीय तद्बव
अग्रदेशे महामेन स्मरमं कारये — न षट्कोणं विलिखेत्तत्र
साध्यसमन्वितं चिंतामणिं विलिख्याथ षट्सु कोणेषु संलिखेत्
वह्निज्वालारव्यायुक्तो रेखा कार्या सुतद्बहिः कार्तिकेयाय संनम।
मश्चात्सहस्रकं मूलमंत्रेण तत्सम्यक्स्थापयेत्पत्रराजं वै वो
रव्याघ्रक्रोडसर्परिपुभूतपिशाचकः नश्यन्ते निकरा विघ्न यंत्रस्या
स्य प्रभावतः । श्रीकंठसंहितायां । शृणु देवि प्रवक्ष्यामि मंत्ररत्नम
नाकुलं नवरो देवदनस्यशत्रुक्षयकरं परं सर्वत्तो महादेवि मा।
हाकाले ध्रुसंयुतः तदयस्य भुजंगेशो वालोशा सदयशिवे अर्धी
शानदयोर्देवि सर्वार्थदं श्रीमुखीस्तथा वीजमेतन्समाख्यातं सर्व।
सिद्धिकरं परं सर्वतै शान्तकारः महाकालेशो भुजंगेशो रेफः वा
लीशो यकारः अर्धीशः ऊकारः श्रीमुखीविंदुः एतेन पिण्डितं स्कू
हनिबीजं भवति ऋषिर्बिल्लामस्य दिष्टो गायत्री छंद ईरितं श्रीरुद्रो

वि.
ती.
१३१

931

देवताप्रोक्तासर्वाभीष्टप्रदायेभवेत् षड्दीर्घभाजावीजेन षडंगा
निप्रकल्पयेत् तकाररहितं मूलं वीजं जलवह्न्यन्वितं चतुरिदे
विवीजानि देवस्तागिरिनेदिनि जयाख्याविजयोयस्त्राह्यजिता
पराजिताः वीजमशलिङ्गमत्सकारयोर्थपंकेततः कमनष्टादिशुवि
न्यसेत् षडंगामितलावधिः देवेदेवीस्ववीजाफांकनिष्टादिशुवि।
मसेत् यदामूर्द्धावधिन्यसन्तुहिताजगरीपरि मूर्द्धादिपादपर्यंतं
तलाभ्यांव्यापकंन्यसेत् षडंगानिपुनर्न्यस्य देवंदेवीस्मरेवत् शि
शेवदनस्त्राभिग्रदेशाकमनोन्यसेत् पंचमनन्तरे देवीध्यायेद्देवीम
नवधीः उदितादित्यरुचिरेचवंक्रांत्रिलोचनं वेद्वार्थप्रदांवरदले
ध्वजाभिर्दधतंक्रमात् दक्षिणोर्द्धकेदेवीमरुणिषद्भागवलीना त
गावद्यजजेदेवंसमभ्यर्च्यपादिभिः शिवे नवसकमलैर्विहानतु।
लोमविलोमगैः धर्मादिकैरधर्माद्यैःपादगात्राणिकल्पयेत् १का
देणन्यसेदेवितंत्रगुणागुणमथ चतुर्थपंचमाणांते स्वराभ्यांवर
लीनि मायाविद्यामयेदेविशुद्धदंदकेदन्यसेत् षष्ठस्वरेणपद्मव
रूपयित्वावशानने संध्यरस्तैर्महादेविचन्द्रभिश्च यथाक्रमे वामाद्या
एनयेदेनावामामिष्ठानततःपरं रौद्रीचैकावताध्येयावामाद्यापामहे
सारि इत्यंसंकल्पितेपीठेमूर्तिंसंकल्पमूलतः नस्मादावाह्यदेवेशं
वंदेविसर्जयेत् चन्द्रीरसमाप्तकम्बवास्तव्याकृते ग्रहपर्यंतं।
मेदेवियजेदावरणैःसह श्रावेणानिसंसउपकेसरेषुयथ्यापव
दिकत्रिषुजेदेविसस्वर्वीजादिकाः क्रमात् वामायाः स्वेसुदिता
रक्तारक्तानुलेपनाः ग्रहणाग्रकपुष्पायास्तावलाश्रितानना व
सीकीवादनरतासदविभ्रममंथराः कोणपत्रेषुवामाभ्यर्चा हृनीवीजा
रिकाः क्रमात् दुर्भगास्तुभगाविवकरालीमोहिनीततः वह्निवीथी
हृदयोरविलोकेशान्तास्तुध्यायेत् इत्थंयोभजतेदेविनंवरंविधि

त्रेः नतस्यतुल्यंकिंचिदपिलोकेषुविद्यते। अथप्रयोगः।
तत्रप्रातःकृत्वादियोगपीठन्यासांतेमूलेनप्राणायामत्रयंकृ
त्वा शिरसि ब्रह्मऋषयेनमः मुखेगायत्रीछंदसेनमः हृदये
श्रीत्र्यंबकरुद्रायदेवतायैनमः इतिविन्यस्य ममसर्वाभीष्टसि
द्धयेविनियोगः इतिकृतांजलिर्वदेत् ह्स्रांहृदयायनमः ह्स्रीं
शिरसेस्वाहा ह्स्रूंशिखायैवषट् ह्स्रैंकवचायहुं ह्स्रौंनेत्रत्रया
यवौषट् ह्स्रः अस्त्रायफट् इतिषडंगमंत्रांकनिष्ठादितलांतंकर
योर्विन्यस्य पुनः ह्स्रूंनमः इतिकेवलबीजमेकनिष्ठाद्यंगुलिषु
विन्यस्य करयोर्व्यापकंकृत्वा कनिष्ठयोः ह्स्रौंत्र्यंबकरुद्रायन
मः अनामिकयोः ह्स्रूंजयायैनमः मध्यमयोः ह्स्रूंविजयायै।
नमः तर्जन्योः ह्स्रूंअजितायैनमः अंगुष्ठयोः ह्स्रूंअपराजितायै
नमः इतिविन्यस्य ध्यानाद्यात्मपूजांतेपूजाचक्रंयथोक्तंकृत्वा
संस्थाप्य तत्रमंडूकादिसिंहासनांतेप्रागवत्संपूज्य सिंहास।
नस्यपादेषु अंधर्मायनमः आंज्ञानायनमः इंवैराग्यायनमः
ईंऐश्वर्यायनमः तस्यगात्रेषु लंअधर्मायनमः लृंअज्ञानायन
मः ऌंअनैश्वर्यायनमः इतिसंपूज्य ततोनेनपद्मअनेकसंविना
लेनसंपूज्य ईंप्रकृतिमयपत्रेभ्योनमः ऊंविकारमयकेसरेभ्यो
नमः ऊंसर्वेनात्मरूपायैकर्णिकायैनमः इतिसंपूजयेत् अत्र
स्वष्टस्वरेणपद्ममित्यनेनप्रणवस्याकर्णिकालक्ष्यतेपद्मस्य
प्रागवत्स्वजितादिति ततःसूर्यादिमंडलपूजांतेइष्टवोधात्मने
सत्त्वाय इत्यादिगुणत्रयंप्रकारादियथावत्पूजात्मवत्तृष्टयपूजां
ते दिग्दलेकेसरेषु ऐंवामायै· ऐंज्येष्ठायै· औंरौद्र्यै· औंइच्छायै·
इतिशक्तिः चतुष्टयंपूजयेत् अत्रनवशक्तिपूजनेनाज्ञातिश
नीयत्वेनविशिष्य सर्वायशक्तिचतुष्टयमात्रस्योक्तत्वात् पीवा

पीठनवशक्तिवह्निभूतेस्याशक्तिः संप्रहृष्टेति हस्तंयपीठशक्तं
विधाय तत्रमूर्तिकल्पनादिषडंगपूजांते:षट्दलेषु देवाद्यादि
गदलवत्नषट्येप्रादक्षिण्येन ऐंवामायै। ऐंज्येष्ठायै। ओंरौद्र्यैः
ओंरक्षायै अग्न्यादिकोणपत्रेषु शंङ्गमेगायै। घंसुभगायै। संक
रासै। हूंमोहिन्यै। इतिसंपूज्य इंद्रादिपूर्वचेनादि सर्वसमापयेदि
ति तथा लक्षमेकंजपेन्मंत्रं तहपांशेहुतैर्द्रुनेन् तर्पिणमार्ज
नेस्तवाब्राह्मणान्भोजयेत्तथा वायुवह्निगुणागतस्य बीजेन स्तवा
जपेत्त्रिये स्वाष्टलमहारोगान्नश्यति तेन तत्क्षणात् रूपितस्य।
लिरंभोन्नेस्तवाबीजमिदंजपेत् तत्कोपशमये क्लींत्रूंफवमंत्रश्र।
भावतः पतन्मंत्राभिजंमंत्रतनल्पशान्तःपिवेन्नरः लद्दोगकमला
कामाश्वासविष्टंभकास्तथा नश्यति तत्क्षणादेव नात्र कार्या वि।
वारणा मंडलेन वनाभाण्डे कृत्वारंभमहेश्वरि नरसंस्थापयेद।
स्याकलशान्त्रवमंत्रवित् देवमध्येष्टमतथा देवीहस्तौ प्रपूजयेत्
षरोकवतेनसिंचेत्कलजायोषितं नाशिवे सर्वंवध्यापि मूलवकिं
मस्याकन्यकाश्रमः राजाभिषिक्तोविजयी भूयादेविन संशयः
भूतप्रेतादिकाकृत्यारोगानपंणत्विमेवितानात् अष्टपत्रोत्तमेमध्ये स।
साध्यबीजमालिखेत् केसरेषुस्वरान्देवि दिक्कोत्रपालिखेत्तरः पू
वीके दवीबीजानिविदिक्कोत्रपार्वति हृतीमंत्रास्त्ररोक्तानालिखे
त्रदयः पुनः भूतदयविधायाथ नघोमध्येसमालिखेत् ककारा।
दिक्काणितान्वित्रुस्त्रकान्महेश्वरि तदबिस्पातरस्तेणावेष्टयेज्जगा।
दीश्चपि पतंग्नेत्रमहादेवि विप्रांके श्रीं लिखेगोन्नवन साधितंजपहो
माभ्यां स्तंतनाशयत्येतेणान् रोगकर्मापहनूहासमरम्भनापस्मारको
दिकान् प्रथमस्तवनाप्रकारस्त्वागतः। श्रीकृष्णसंहितायां। दैव
पालमंत्रवदेस्मृत्युदेवियथाविधिः सर्वतोत्रयहोदाकोकं।

वर्तिकोमुत्रः आषाढीरेवतीयुक्तोलोहितोनंतसंयुतः पिनाकी
वाननयुतोवलीमेषलतोभवेत् महाकालीविसर्गोपास्ताशाघो
यमत्रप्रिये संवर्तः त्तः ष्ट्रणग्रहः औंइंडः अनुस्वाराः तेनखोर
निरुद्दः पकारः संवर्तः त्तेनेत्ते इति आषाढीतः रेवती रतेन
यइति लोहितः यः अनंतः आतेन याइति पिनाकी लयुतेनमः
आनीतलाइति वालीय मेषो नमहाकालो मविसर्गः अः तेन
मः इतितारायः ग्रणवायः तथा मुनिर्वेलासमुद्दिष्टोगायत्रंछ
दइति क्षेत्रपालोदेवतास्यतद्वीजंपरिकीर्तितं नमःशक्तिरिति
प्रोक्तमिष्टसिद्धिकरः स्मृतः षड्दीर्घभाजवीजेनषडंगानिप्रक
ल्पयेत् ततःसंचिंतयेद्देवंक्षेत्रपालमनन्यधीः अंजनाद्रिप्रतीका
शमूर्द्धपिंगजटाधरं वर्तलोग्निः त्रेतयमंभीमसर्पविभूषणं द
ष्ट्राकरालवदनंभीमरूपदिगंबरं द्विभुजंदक्षिणेहस्तेगदांक
मेकपालकं दधनंचिंतयेन्नित्यंशैवपीठेसमर्चयेत् पद्ममष्टद
लंचाद्येगंधाद्यैरर्चयेच्छिवं आदावंगानिसंपूज्यएवंचमरमेष्ठ
रिः अष्टौयेदष्टपत्रेषुकिंकराष्टकमच्छिनं अनलाचार्यिकेशाश्च
क्षेत्रपालस्यकिंकराः लोकेशास्त्रंतदस्त्राणिएवंवन्परिपूजयेत्
स्वपदीपादिकंकृत्वातत्तत्स्मैवलिंहरेत् वलिनैवेद्यं। तत्रमंत्रः
पत्रादीनिसमस्तार्णविंदुतस्यपुरुहूतं भंजयदिनपपश्चात्र
तेषविजेयनतः विघ्नस्यगंमरहोतस्याइदंवंक्षेत्रपालवं वलिं।
पदसमस्तार्थदेविशहृदयहिंदः वलिमंत्रः समाख्याताः स
र्वकर्मफलप्रदः हिंदः स्वाहाः अत्रस्यागमं। अथप्रयोगः।
तत्रप्रागवद्योगपीठन्यासांते शिरसि ब्रह्मणेरुद्रऋषयेनमः मुखे
गायत्रीछंदसेनमः हृदये श्रीक्षेत्रपालायदेवतायैनमः गुह्ये
क्षोंबीजायनमः पादयोः नमःशक्तयेनमः इतिविन्यस्य मम

सर्वाभीष्टये विनियोगः इति कृत्वांजलिं विरेत् ततः ह्रां रुद्रा
याय नमः ह्रीं शिरसे स्वाहा ह्रूं शिखायै वषट् ह्रैं कवचाय हुं
ह्रौं नेत्रत्रयाय वौषट् ह्रः अस्त्राय फट् इति मंत्रेण अंगुष्ठादितलां
करयोर्विन्यस्य हृदयादिषडंगेष्वपि न्यसेत् ततो ध्यानादिषडंग
पूजांतेः अष्टदलेषु अनलाय अग्निकेशाय करालाय वेतालाय
महाकायाय पिशिताशिनाय ऊर्ध्वकेशाय इति संपूज्य लोके
शार्वादिसर्वं समापयेदिति । तथा एकलक्षं जपेन्मंत्रं कृत्या
मद्दशांशतः वृक्षणाहुतमिनेलतर्पणादि ततस्त्यजेत् रात्रौ हुं
गणेरम्ये कृत्वा स्थंडिलमुत्तमं आवाह्य तत्र संपूज्य तैत्रेश श्रीकं
वर्मनाः अत्रयं जनेदुष्यात्रैः श्रुत्वा वैसिक्यकं महान् सर्वोक्तमर्व
नारीवतनस्मद्रने वलिं हरेत् वलिनानेन संतुष्टः क्षेत्रपालो सुर
विनाः पेशाथर्य विजयारोग्य श्रीसौभाग्यादिसंपदः दद्यान्निरुद्र
भूतादिकृत्याद्यामुनिवारयेत् अत्रागो वलिदानेकामान्निस
स्नापयामपि नैवेद्यप्रोक्तमंत्रेणारेयम् । अथ वटुकमंत्राः । त
वर्णीकौलेशकोटिभैरवे । अथ वक्ष्ये महादेवि भैरवस्महीय
रि मंत्रात्म महोग्रदुष्टग्रहनिकृंतन सर्वशत्रुक्षयकं सर्वे ।
वाधिविनाशनं सर्वोपचारकं देवि सर्वसौभाग्यदायके वपूण
कर्षणविद्वेषणस्तंभनोच्चाटमारणे निग्रहव्याधिकरणे प्रशाल
मतिविलेष्टं उंटी विद्यमहामंत्रपूर्णपावहितोप्रिये मार्ग ।
शान्तिनित्याभिकर्द्वैहोजमादिके नूलवारवेचतीकरणपन्ना
कायमनःशिवे अनेनोलोहिनोशानिकर्णं वाजीनसुरमकं
वक्रिस्पवमोमंत्रश्रुतः पवनपवव कोधीकरणश्रुनोवकीव
गिवाम्यमेश्वरि श्रुनेरोनदृष्ट्य प्रोक्तादिनीयार्णादि पार्वति वन
हृदयमवर्णानाश्रुनरोद्यसमुद्धयेन एकविंशतिवर्णात्मामंत्रा ।

नेमस्तु हृताः गोपनीयः प्रयत्नेन त्रैलोक्ये च सुदुर्लभं ओमहाः प्रथमो रेफः शान्तिः ईश्वरीति वह्निरेफः रेफश्च मोक्षः अवन्तः प्रोक्तेन इति द्वितीयार्णादि चतुष्टयं वज्रकाय इति आद्यं ह्रीं इति नेत्र वखेचरी टकारोऽत्र तेन रकार इति काय स्वरूपं आनन्तः आतेन रगा इति पञ्चमो य क्रोधी कः कारः उनेन ऊं इति वह्निनाकारेण तेन क इति भैरवेन हृदयं ऊं इति द्वितीयार्णादि चतुष्टयं वज्रकाय इति आद्यं ह्रीं इति तथा ऋषिरुक्तो महादेवि बृहदारण्यकः अनुष्टुप् छन्द इत्युक्तं भैरवो देवता शिवे पान्ति बीजं च शक्तिश्च आकीलकं च तालते आद्यन्तं रुद्रं गन्दे विपंचदद्वा नितेऊऊ सद्यादि प्रतिलोमेन नन्तमक विवर्जितं पञ्चबीज हृदयादि स्वरस्य आः पवत्र नेयः श्रुति विष्णुशलीश मूर्धास्य हृदये श्रव सगमवारणे वं मूर्धास्य दृग्कर्णिके वामकर्णे वहू उपयः ऊर्ध्वस्य वीतिकोतरे पश्चिमे श्रुचवर्ण सुमृतेयतां महेश्वरि ईशाना ख्यमात्र ऋषिपीठे देवि सनीयकः वामदेवस्त्वतयः स्यात्सद्योजातस्त्वपंचमः पुनराद्यक्षराले षट्दीर्घस्वरभेदितं कृत्वा तेन षडङ्गानि शान्ति पुकानि कल्पयेत् । श्रीरुद्रयामले । देव्युवाच । देवदेव जगन्नाथ शंभो त्रैलोक्यनायकः भैरवस्य विधिः स्यो समाचक्ष्व महामते येन कार्याणि सिध्यन्ति साधकानां निरंतरं ततः क्रिया समायाय विधिं कथय शोभनः । श्रीभैरव उ॰ शृणु देवि प्रवक्ष्यामि वटुकस्य महात्मनः विधानं परमं गोप्यं ब्रह्मादीनां सुदुर्लभं स्नेहेनैव मया तेऽद्य कथयिष्यामि वल्लभे येन विज्ञानमात्रेण त्रैलोक्यं साधयेत्सुधीः एकदा देवदेवेशं तपसे मंदिरालयं गतोऽहं परमानंदान्मूलत्रिकोनिमीश्वरी वकेपरमसंतुष्टा तपसा विघ्नात्मना सकायमूर्ति देवी प्रोवाच वचनेनमुदा त्रणाहं शंकर प्रीता वरं वरय दुर्लभे

स्तुगोप्यमपि देवेशि विधिप्र श्रुति शंकर येना हंते प्रियादेव सर्वार्थ निरंतरं व

वि॰
तं॰
१३४

934

मा इतिवाक्यंसमाकर्ण्यश्रीवाचादेसवल्लभे हेविमातर्जगन्मस्ते
यदिदासस्मिमेवरं दुर्लभंकस्यचिद्ब्रूहिविधानेपरमाश्चर्यान् मंत्र
सायेनसिध्यंतिसर्वकार्याणिसाधने इतिवाक्यंचमेश्रुत्वाएसभू
तासनातने उवाचयादृशोदेविविधानंश्रृणुवल्लभे वटुकाख्यस्यदेव
स्यभैरवस्यमहात्मनः ब्रह्मविष्णुमहेशाद्यैः वंदितस्यदयानिधिः
न्यासापंचदशप्रोक्तावटुकाराधनेशिवे यांविनालेवसिद्धिस्याद्वर्षी
णामशतैरपि आदौन्यासान्येतवीजेनकार्यंपश्चान्न्यासान्तास्तिहवी।
जैनदेवि न्यासोंकार्यंकारणवीजेननतन्न्यासाह्रींजेन्यासमश्रीवि
दध्यात् महाश्रीवीजेननाम्यासंसप्राणवीजेनवापरे खेटावीजस्यवन्या।
सविधायस्यातिवीजेनः मूलवीजेनपश्चात्तुन्यासंकुर्वान्महामतिः
भ्रामरीवीजतोन्यासंविदध्याद्धीजसंयुतं पंचन्यासान्प्रसादोतन
करोतिनरोयदा नाशपीठवराराहेनावमंत्रोनसिद्ध्यति। श्रीदे
व्युवाच। देवदेवजगन्नाथशंभोसंसारतारकः कृपांकृत्वान्यास
विधिंप्रोक्तयेननिरूपय कालेनहृदयथालेनसाधकःसिद्धिमाप्नुया
त् गोपनीयोमंत्रोयंवटुकाख्योजगद्गुरोः तथापिप्रियविभौवाल
कोपियथालभेत्। श्रीशिवउवाच। श्रृणुदेविजगन्मातर्न्यासवी
नानिशोभने प्रकरपतिमयाप्रीत्याकथयामिहितोपतेः स्थानेषु
नेनवीजानिन्यस्तव्यानिमहात्मभिः तथात्रप्रवक्ष्यामिश्रृणुस।
ख्याणवल्लभे शिवंचेदृशिवैः शाक्तैस्तुरूपतैः सविंदुभिः प्रेतवीजेस
मारव्यातेनेनांगानिन्यसेच्चषट् लक्षितासिशिखावानेत्रकवचास्त्रेषु
सुंदरि शिवोहंचद्रःसःशाकस्वरः श्रौतथामूर्द्धिवाक्रोशनाभौहृद
नांगुलीषुच पादांगुलीषुदेवशिन्यसेन्न्यासंसुंदरि संवर्तःतःकाली।
वामाली ईविंदुःप्रनुसारः नादः सूर्द्धचरः तथामूर्द्धिवाक्रोशलिंगाग
नाभौहस्तांगुलीषुच पादांगुलीषुदेवशिविन्यसेत्परमेश्वरि श्रोत्रे

योनिस्समारूढाः शक्रः स्वरपाशीयुतः क्रोणबीजमिदं प्रोक्तं विन्यसे
त्परमेश्वरि अजेशाक्रः अग्निरेशकस्वरः श्रोंशरीबिंदुः तथा ब्रह्मरंध्रे
मुखे नेत्रयोर्ग्रीवायां नासापुटे कपोलयोश्चिबुके ब्रह्मरंध्रे पुनर्न्यसेत्
कालशक्रशिवाः सद्योबिंदुर्नादविभूषितः मायाबीजं महेशानि पाद
योर्हस्तयोस्तथा नेत्रयोः श्रोत्रयोः ऊर्ध्वो मेढ्रेचैव प्रविन्यसेत् कालः सश
क्रः स्वशिवोहमय औ· तथा अग्न्याग्निवामकर्णेडनादैर्विभूषितं म
हाग्नीबीजमीशानि चिबुके पार्श्वयोर्गले पादयोर्हृदये पादद्वयोर्नाभौ।
वपादयोः अस्थिपाः अग्निर वामकर्ण ऊर्ध्व नादौ प्रायवत् तथा लोहि
ताख्यमनोवामकर्णबिंदुभिरंकिते शाणबीजं मुखे देवि हृदये नाभिमं
डले हृदये पादयोर्देवि हृदये दक्षऊरुके हृदये वामऊरौ च हृदये दक्ष
पार्श्वे हृदये वामदेवहृदये दक्षनेत्रके हृदये वामनेत्रे च हृदये दक्ष
घ्राणके हृदये वामपार्श्वे च हृदये दक्षकर्णके हृदये वामकर्णे च हृ
दये विन्यसेत्प्रिये लोहितः प· अग्निः वामकर्ण उ· बहुर्व नादपि वि
तेयः तथा कंदरी योग्निमारूढो वामकर्णके रुदंतोनावदन् घंटावी
जमहादेवि विन्यसेत्परमेश्वरि कंदरीय अग्न्यत्प्रायवत् घंटिकायांवना
भौ च घंटिकायां हृदि न्यसेत् पादयोर्हृदये कंठे मस्तके मस्तके करौ
स्तनयोर्गुल्फयोश्चैव गुल्फयोस्तनयोर्न्यसेत् घंटेशो वायुवक्त्राख्यो वा
मकर्णेन्दुनादवान् ख्यातिं बीजमिति प्रोक्तं विन्यसेद्धि विभावकः घंटेशा
वायुवक्त्राद्दिपाकर्णमस्तकेकटौ स्तनयोर्गुल्फयोश्चैव पादयोश्चैव ग्री
वायां नाभिमंडले गले वक्त्रे दिवे शीर्षे च योन्नेत्रयोस्तथा कर्णयोर्वीर
पार्श्वे च स्तनयोश्चैव विन्यसेत् शणवो मूलबीजं स्याद्धृदयोपादयोः प्रि
कर्णयोर्भूमायुग्मेचैव प्रविन्यसेत् हिरंडरेवतीशाक वेदरसं इंबिंदु ना
दोप्रायवत् मुखे नेत्रद्वयेण कर्णद्वये चैव कपोलयोः गंडयोः कर्णदे
शे च स्तनयोर्हृदि पादयोः चिबुके मस्तके बाह्वोः स्कंधयोर्दंतलग्नयोः

वि·
ए·
१३५

135

ब्रह्मरंध्रे तथा भाले भ्रूमध्ये च मसेत्रिये इति न्यासान्समाधाय ब्रह्म
रणकारकः यथोक्तन्यासकारी च दिनो वरमोक्षयात् तदाकन्याह
षणोस्य मम पापं प्रनाशयताम्। न्यासैरेतैर्वरारोहे ब्रह्महत्याविनश्य
ति का कथान्यस्य पापस्य सत्यं सत्यं वदामि ते मम न्यासान्यथोवत्सो
ह देवस्य महात्मनः यान्निधाय नरो विन्देत्सिद्धिं लोके सुदुर्लभं ब्र
हृतवीजं विन्यस्य मस्तके गंडयोस्तुवि कालवीजं वक्षसोस्कर्णयो
पि विन्यसेत् नाभौ लिंगे गुदे वापि विद्यावीजं कपोलयोः ब्रह्मरंध्रे
तपकौ विन्यसेत्साधकोत्तमः। श्रीदेव्युवाच। भगवन्करुणासिंधो
दीनबंधो जगद्गुरो कृपां कृत्वा समाख्याहि नैवेद्यस्य कथं कथं साध
कस्तु यथा सिद्धिमविरोधेन विंदति श्रीमहादेव उवाच। शृणु देवि
प्रवक्ष्यामि न्यासत्रयविधिं पृथक् दीर्घकालाग्निसंज्ञानि मयः का
लानुलोमकाः वह्निस्थवह्निगगने वेद्यावामाक्षिमंडिता बिंदुनादस
माक्रान्ता वीजमाकृत्य सुहृते दीर्घान· कालोम· अग्निर· शाकलः का
ल· मस· अनल· २· ग्रेमः लवह्निः अस्थिरा· वह्निः· २· गगनं ह
वेदस· वामाक्षी· ई बिंदुनादश्च प्राग्वत् तथा वल्लाग्नी हाग्निकाल
क्रिवामाक्षिमिश्रये सैव बिंदुनादैर्देवापि विद्यावीजं सुहृते मेवत
तः अनलः रवेद्रः सः अग्निः शिवः रुद्रः सविसर्गः ई वीरवि
प्राग्वत् तथा एतन्न्यासत्रयं प्रोक्तं साधकाभीष्टसिद्धिदं यस्य प्रसा
मामाद्यैभैरवः शीघ्रसिद्धिदः शृणु देवि प्रवक्ष्यामि सुखेलान्यासमु
नमं यस्य प्रसादाद्दाशिवेव वटुकः सिद्धिदो भवेत् मस्तके दक्ष
वामनेत्रस्तथैव च दक्षकर्णे कपोले दक्षिणे तथा वामे कपोले
वगंडके वामके पुनः चिबुके न्यगालोष्ठके पृ दक्षिणे वामस्तथा ल
नेत्रले च वामे च बलदये दक्षकंठके वामकर्णे च नाभौ च वक्षसि
वामके लिंगमेढ्र दक्षिणे च वामे च वरवर्णिनि मेढ्रशाखोष्ठपार्श्व

वीदत्तवामनिरेंशालिंगस्योक्तनाद्वेति मूलाधारेदत्तगुल्फेवा
मगुल्फेमतथैवच दत्तपादेचवामेचदत्तापादांगुलीषुच वामपा।
दांगुलीषुचवक्षस्थिरंध्रेतथैवच मूलाधारेपुनश्चैवपुनर्वैब्रह्मरंध्रके
महापरात्मवीजेचविन्यसेत्साधकोत्तमः वंद्रसूर्योपुनर्लोवमही
ब्रह्मामहीष्टिये त्रिमूर्तिरस्थिवक्षोपरणीतल षष्ठस्वरत्रिमूर्तीतो
नादश्चषितमस्तके महापरात्मवीजंनेकथितंसर्ववारिते वंद्रसू
र्यौमहीपुनर्लोवसूर्यौमहादिवेमर्थः महीलः ब्रह्मीकः मही
लः त्रिमूर्तिः ईस्वरस्थि षाःवन्हि न ग्रेठः वन्हिः रः ग्रेठ परणी लः ज
लः वषष्ठस्वरः ऊः त्रिमूर्तिः ईंइन्दुनादौ प्राग्वन्यासेनानमुष्योणिसा
तात्त्विकसमोभवेत् वटुकस्याथवक्ष्यामिमातृकान्यासमुत्तमं हु
र्लनेयेनवटकोसाधकस्यकरेभवेत् श्रीवीजेःपूर्वभिर्यत्रमातृकां
मंडलेभवेत् षोडशाक्षरे वंद्रीतेवनांतेफांतेनतयांतके वटुकस्यपरं
स्यमातृकान्यासमुत्तमं वितायसाधयोत्यान्तःसप्तघःशिवतात्रजे
त विनेमेमातृकान्यासंयोमेनन्यासमाचरेत् वटुकस्तस्यऋपितःस
घःशांतिं प्रयच्छति तस्मान्न्यासःप्रकर्तव्यःसाधकेनविपश्चितः स
वैषुमातृकानेषु वपुःपार्विमेहैतवै मातृकान्यासमेतेनहिसकायो
न्यसमाचरेत् वर्षकोटिप्रयत्नेनसंसिद्धिदः स्वकारमादिमंकृता।
न्यासोयंवारवर्णीनि नाम्नावहिर्मातृकाख्योन्यासश्चउत्तमाणिभवेत्
ध्यानादिपूर्ववद्देविकथितानिमहात्मने श्रुयान्ततोन्यासमाख्यास्या
म्यहंप्रवरवर्णिनि सरस्वतीमातृकाख्यसप्तघःसिद्धिप्रदायकं न
सेन्महामनेवीजंमातृकास्थानमेवच महासरस्वतीदिव्याःसप्तघः
सिद्धिप्रदायके क्रोधीशाद्यःपिनाकीशोदारुकेशभुजंगकौः
श्रीवीजनफलीशौवभुजगानफलीशिवे संवर्तककरेवन्यासि।
शौनीनुविभूषितः महासरस्वतीवीजंकथितंदेविदुर्लभं क्रोधी

घ्राः कः पिनाकीशः लदाकुकेशः ३ भुजंगणाश्वकीशाः ममकपाली
शोत्र॰ भुजंगार॰ नकुली हसंवर्तेतः वकक्ष॰ पाणिवनीर विमूर्तिः
ठेठेडः बिंदुः तथा इति न्यासस्य माख्योनावदु कायायने शिवे सद्यः
सिद्धिकरोदविभागफलध्यानसंशयः न्यूनन्यासस्य कनीयः सघोरा
निमवाघुयात् पतस्मादपिकाख्यासाविधिः स्याद्यनन्तजन्मनि। तथा
कैलेशाकोरिषभेदे। पतंन्यासस्त्वं देवीध्यायेद्रुद्रभैरवं षुद्रस्फ
विकसंकाशंत्रिनेत्रमलशोभितं अरिल्लालकसवीचवारुणोरस्मा
लोडजे नानारत्नमयाकल्पैः किंकिणीजालनूपुरैः मेघश्यांवराखी
मेहिभुजंदतिणेकरे त्रिशिलेमधहस्तेवेरयानदंडमसुनं वद्धे
घयरंशांभुसात्विकसात्यिकः स्मरेत्। रुद्रयामले। कपालं वाम
हलेनसत्वंदंडवरदक्षिणे इत्यं केसात्विकेचैव जपध्यानं तथैव
सनवर्णंचतुर्वीरुजटामुकुटधारिणं त्रिपलयोगहस्तकमंडले
त्रिनेत्रंतिलकंरैचसकाभरणभूषिते एवंध्यात्वायजेद्देवंशोवपी
टेलेशानि ग्रहपदेमहादिविकर्णिकाकेसरोज्वलं पंचविलिखे
नन्मध्ये कर्णिकायां महेशानि कृत्वाषट्कोणसंस्थानं त्रिकोणप
विकल्पयेत् व्योमपंचमेतनमध्ये वसुपत्रविराजितं कर्णिकाके
मेरुंकेवलवमुत्रयवहिः चतुर्हारसमायुक्तं।
त मूर्तिमूलेनसंकल्पनसामावाहयेत्तन्मध्ये वहुकेयजे
मूलायैनमइत्यादिः स्थापयेत्प्रभो सद्योजातेनमंत्रेण
त्रिधापाद्यमूलेनसंनिरोधयेत् वामदेवेनमूलायैनवमुत्रजेत् स
गुंठयानमूलेनः षडंगैः सकलीकृत्य मूलेनसन्मुखीकृत्वा अव
करणांचैवसमुद्रादिभिकृतमावत अमृतीकृत्य सवमूलेनः परमी
मारिनः कृत्वामुस्थापनेतन पतन्मध्ये विधानं यतनो ध्यात्वास
घ्रायोनिमुद्रा कृतत्रयाः समुद्रांसदर्शयेदयः लिंगाद्याश्च सुदि
नीटर्शयेत्तानृकृसमूलाभ्यां च महेशानि

ईशानेनेनमस्कुर्यान्मूलाद्येममहेश्वरि आसनंयेष्वपुष्पोनेहृपवा
वैस्तनोर्च्चयेत् डाकिनीपुत्रकान्देवि राकिनीपुत्रकानपि लाकिनी
पुत्रकान्पश्चात्काकिनीपुत्रकानथ शाकिनीपुत्रकान्भूयो हाकिनी।
पुत्रकांस्ततः मालिनीपुत्रकान्देवी देवीपुत्रानतःपरं अमापुत्रान् रु
द्रपुत्रान्स्वतान्देवि यजेद्दलोजलेशयोः अंतरालेमहेशानि पुत्रव
र्गोस्वयोर्मध्ये ऊर्ध्वमुखाः स्वतान्यसेत् अधोमुखांस्वतान्देवि यजेद्द
लोजलेशयोः अंतरालेमहेशानि पुत्रवर्गास्वयोदशः। हृदया
मले। रुद्रपुत्रानेतरं। देशग्रामाधिपश्चैव स्थानाधिपमनुक्रमा।
त् मेपतादिश्रवणाख्यं कालहंतं तथैव च क्षेत्रकं यथोपदेशमाग्र
जौलिरस्यमेषत्र तद्वाह्ये पद्मपत्रेषु पूजयेत् ब्रह्माणीपुत्रकं एवं
माहेशीपुत्रमेश्वरि माहेशीपुत्रकं सौम्यं कौमारीपुत्रमानिले
ईशाणीपुत्रकं देवि पश्चिमे पूजयेत्ततः देविशीनैर्ऋते पश्चात्महा
लक्ष्मीपुत्रमर्चयेत् वाराहीपुत्रकं देवि दक्षिणे वह्निकोणके वायु
पुत्रमभ्यर्च्य लोकेशवटुकांश्च अष्टपत्रान्बहिर्देवि वनरसं
तर्पुनः अष्टदिक्षु यजेद्देवान् हेतुकं त्रिपुरान्तकं वेतालमग्निजि।
ह्वं कालान्तकमतःपरं करालमेकपादं च भीमरूपं महेश्वरि अ
मिश्वं ईशयोर्मध्ये यजेद्देवलमक्षिते हाटकेशं महेशानि पाशी
शान्तमयोस्तथा वनरसादिरेखायां भ्रिंवदिक्ष्वारेश्वरि अंतरा
ले भवाभ्यर्च्य क्षेत्रकं वटीश्वरेश्वरि अवाधितान्समापश्यन्तितीया
यामममर्चयेत् वटीश्वरादिभूगवानान्कुलीशादिकान्शिवे देव।
सावामभोगेन पूजयेत्परमेश्वरि दिग्वतीरेत भूमिषु छागोगीशान्
ल्किं समप्तुतान् योगिनीश्च समभ्यर्च्य दीशानादिषु सुंदरि कोणेषु
देवदेवेशादिग्गीशानायुधैः सह वनरसाद्बहिर्देवि पूजयेत्कल
वर्णमना इतिसंपूजयेद्देववटुकंभक्तितत्परः पंचमीयांकाममोनाणा

वि॰
ली॰
१२१
(937)

पतिर्भवति मानवः । अथ प्रयोगः । तत्र प्रातःकृत्यादियोगपीठन्यासां
ते मूलेन प्राणायामत्रयं कृत्वा विंदुविसर्गमातृकान्यासानंतरं ऋका
रादिजकारांता नववर्णाव्यापकं ततो गलादिजन्मपिसंबंधांते श्या
नेष्ठ विन्यस्य कलामातृकां श्रीबीजादिमातृकान्यासानंतरं पुनश्च
श्रीं नमः इत्यानंतरं श्रां नमः इत्यादि श्रुं नमः इत्यंते केवलाक्षराणि पुट
मातृकावद्विन्यस्य पुनरीकारादौ श्रीबीजं पुनः स्वकारादौ पुनर्वका
रादौ पुनरेकारांते श्रीं नमः इति विन्यसेत् ततः कलपुरस्सराद्वृत्त
श्रीं श्रं इत्यादिमातृकां विन्यस्य ततः कामबीजादियोगपीठन्यासां
ते मूलेन प्राणायामत्रयं कृत्वा शिरसि हरिहरारण्यकऋषये नमः
मुखे अनुष्टुप्छंदसे नमः हृदये श्रीभैरवाय देवतायै नमः गुह्ये ह्रीं
बीजाय नमः पादयोः क्लीं शक्तये नमः नाभौ श्रां कीलकाय नमः
इति विन्यस्य मम चतुर्विधपुरुषार्थसिद्धये विनियोगः इति कृता
ञ्जलिर्वदेत् ततः श्रां श्रं अंगुष्ठयोः ह्रौं वौं ईशानाय नमः तर्जन्योः
ह्रैं वैं तत्पुरुषाय नमः मध्यमयोः ह्रुं वुं अघोराय नमः अनामिक
योः ह्रीं वीं वामदेवाय नमः कनिष्ठयोः ह्रं वं सद्योजाताय नमः
ततः शिरसि मुखे हृदये गुह्ये पादयोश्चैताः पञ्चमूर्तीर्विन्यस्य पु
नः शिरसि ह्रौं श्रौं ईशानायोर्ध्ववक्त्राय नमः मुखे ह्रैं वैं तत्पुरुषाय
पूर्ववक्त्राय इति तिलकेषु ह्रुं वुं अघोराय दक्षिणवक्त्राय नमः वाम
कर्णे ह्रीं वीं वामदेवायोत्तरवक्त्राय नमः
पश्चिमवक्त्राय इति विन्यस्य ह्रौं वौं हृदयाय नमः ह्रुं वुं सद्योजाता
स्वाहा ह्रूं वूं शिखायै वषट् ह्रैं वैं कवचाय हुं ह्रौं वौं नेत्रत्रयाय वौषट्
ह्रः वः अस्त्राय फट् इति षडंगानि ह्रीं वीं शिरसे
विन्यस्य मंत्रेणाञ्जलित्रयं पुष्पादिकाभिर्दशदिग्बंधनं कृत्वा पु
नः हस्तौ संनिधाय ... बीजेन प्राणायामत्रयं कृत्वा शिरसि हस्तौ

नमः वाह्रौ हल स्त्रींनमः वौह्रौ एवं लिंगनाभिहृत्कंठांगुलीषु
वेदसेववीजेन्यसेत ततः व्रलंरप्रेश्रौंनमः एवंमुखेनेत्रद्वयना
साकपोलद्वयचिबुकव्रलंरप्रेषुवेदसेववीजेन्यसेत्पादयोः म
लेरौं एवंहृत्स्तनद्वयेनेत्रद्वयेश्रोत्रद्वयेकृतिद्वयलिंगेषुवेदसेव।
वीजेन्यसेत चिबुके श्लूंनमः एवंपादद्वयगलग्रावादिद्वयहृदय
द्वयनाभिहृदयपादद्वयहृदयकटिमस्तककटिस्तनद्वयउरू
द्वयस्तनद्वयेवेदसेववीजेन्यस्य मस्तके ग्रौंनमः एवंपादद्वय
ग्रीवानाभिगलहृदयजंघाद्वयबाहुद्वयस्तनद्वयेषुवेदसेववी
जेविन्यस्य हृदयेपादद्वये गेंनमः एवंपादद्वयहस्तद्वयकर्ण
द्वयनासाद्वयेषुविन्यस्य मुखे ग्रंमंह्रौंनमः एवंनेत्रद्वयकर्णद्व
यकपोलद्वयगुणद्वयहृदयपादद्वयहस्तद्वयकर्णद्वयेषुवि
न्यस्य मुखे मलमह्रौंनमः एवंनेत्रद्वयकर्णद्वयकपोल द्वयगं
डद्वयपादद्वयचिबुकमस्तकवाहुद्वयस्कंधद्वयदंतपंक्तिद्वय
वलंरप्रेमलाधाराग्रमध्येषुविन्यस्य शिरसि नत्रलमरलय
हंसौंनमः एवंगंडद्वयेमुखद्वयेमुखेवेदसेववीजेविन्यस्य ने
त्रयोः मलमरमरौंनमः एवंकर्णद्वयनाभिलिंगगुदेषुवेद
सेववीजेविन्यस्य कपोलयोः नरमहंसौंनमः एवंव्रलंर
प्रेदनंपक्रौंश्रवेदसेववीजेविन्यस्य मस्तके [illegible]लकलीग
रवरवलवह्रौंनमः एवंदक्षनेत्रवामनेत्रदक्षकर्णवामकर्ण
दक्षकपोलवामकपोलदक्षगंडवामगंडचिबुककरालकदक्ष
स्कंधवामस्कंधदक्षहस्तवामहस्तस्तनहृदयदक्षकुक्षिवामकुक्षि
नाभि[illegible]मूलाधारे
दक्षजंघावामजंघालिंगदक्षवृषणवामवृषणव्रलंरप्रेमलाधारे
दक्षगुल्फवामगुल्फदक्षवामपादतलद्वयांगुलीषु [illegible] इति कल्पनी
वलंरप्रेषु न्यसेदिति एवं न्यासान्कृत्वा ततो ध्यानादि

वि॰
लिं॰
१३८

938

लैम्लं सद्योजाताय नमः इति प्रागुक्तविधिना मूलमुच्चार्य वा
मदेवाय नमः इति प्राग्वत्संस्थाप्य मूलेन सन्निधाप्य मूलमुच्चार्य घोर
भ्यो नमः इति प्राग्वत्सन्निरुध्य संमुखीकरणादि प्राणप्रतिष्ठान्ते
लिंगमुद्रानंतरं मूलं तत्पुरुषाय नमः इति योनिमुद्रां प्रदर्श्य वि
शूलाख्यामुद्रां यथा एवमेव प्रदर्श्य ईशानाय नमः इति नमस्का
रमुद्रया प्रणम्यासनादिपुष्पान्तानुपचारैर्देवे देवदेहेषु षडंगान्यपि
स्वस्थानेषु ह्रांवां हृदयाय नमः ह्रींवीं शिरसे स्वाहा ह्रूंवूं शिखायै व
षट् ह्रैंवैं कवचाय हुं ह्रौंवौं नेत्रत्रयाय वौषट् ह्रःवः अस्त्राय फट्
इति षडंगानि संपूज्य देवस्य देहे मूर्तिन्यासस्थानेषु पंचदशस्वपि
न्यासोक्तप्रकारेणैव विराट्मा पंचमूर्तीः संपूज्य ततो वामाद्यमारभ्य
वामपद्मकर्णिकायां पूर्वदक्षिणोत्तरपश्चिमेषु ईशानादिवन्मू
र्तीः संपूज्य पंचमीं देवमस्य मूर्तौ पूजयेत् ततोऽनन्तरमष्टदलेषु देवा
ग्रमारभ्य प्रादक्षिण्येन ॐ ग्रां असितांगभैरवाय नमः ॐ क्रों यभै
रवाय नमः लं उन्मत्तभैरवाय नमः पें कपालीभैरवाय नमः ॐ भी
षणभैरवाय नमः शंः संहारभैरवाय नमः इति संपूज्य षट्को
णेषु त्वावामाद्यमारभ्य ॐ ऐशाने नैर्ऋते वायुकोणेषु हृदया
वनसृष्ट्ये देवाग्निकोणे नेत्रंतरादि चतुर्दिक्षु त्वावासमिति षडंगानि प्रा
ग्वत्तस्य अष्टदलपद्माभ्यां तेषु षट्कोणान्तर्दिक्षु देवाद्यमारभ्य
प्रादक्षिण्येनाष्टदिक्षु ॐ डाकिनीपुत्रे ॐ देवीपुत्रे ॐ लाकिनीपु
त्रेभ्यो॰ ॐ काकिनीपुत्रेभ्यो॰ ॐ शाकिनीपुत्रीभ्यो॰ ॐ हाकिनीपु
त्रीभ्यो ॐ मालिनीपुत्रेभ्यो॰ इत्यष्टदिक्षु संपूज्य देवस्य वामभागे
ॐ उमापुत्रे ॐ रुद्रपुत्रे ॐ मातृपुत्रे इति संपूज्य ईशानयोर्मध्ये ॐ
डभैरवीपुत्रेभ्यो नैर्ऋतिवरुणयोर्मध्ये ॐ अघोरवीपुत्रेभ्यो इति
पूर्वायोनुध्यां संपूज्य बहिरष्टदलेषु देवाद्यमारभ्य प्रादक्षिण्येन नमः

ऐंब्राह्मणीपुत्रवटुकायनमः माहेश्वरीपुत्रवटुकायनमः वैष्ण
वीपुत्रवटुकायनमः कौमारीपुत्रवटुकायनमः ऐंद्राणीपुत्रव
टुकायनमः महालक्ष्मीपुत्रवटुकायनमः वाराहीपुत्रवटुका
यनमः चामुंडापुत्रवटुकायनमः वटुका इति संपूज्याष्टपत्रा
द्बहिःश्मशानरक्षाभ्यंतरे देवाग्रमारभ्य प्रादक्षिण्येन हेतुकायन
मः त्रिपुरांतकायनमः वेतालायनमः अग्निजिह्वायनमः
कालांतकायनमः करालायनमः एकपादायनमः भीमरू
पायनमः इत्यष्टदिक्षु संपूज्य तद्बहिःश्मशानरक्षत्रयेतश्मशानरक्षा।
देवाग्रादि प्रादक्षिण्येन दिक्षु श्रीकंठानंतसूक्ष्मत्रिमूर्तिईशा
नाख्याग्न्यादिकोणेष्वमरार्घीशभारभूतितिथीशादिकोणयोर
न्तरालेषु देवस्य दक्षिणाग्रादिप्रादक्षिण्येनाष्टसु स्थाणुहरेशा
न्महासेनेशांतानर्चयेत् द्वितीयरेखायामपि तथैव तथैवा
विदिक्षु न्तरालेषु वक्राधीशाद्यादीशांतानभ्यर्च्य तृतीयरेखा
यामपि तथैव च ईशादि भृग्वीशान्तं संपूज्य नकुलीशशिवे
शौ संवर्तेशान्देवस्य वामभागे संपूज्य तद्बहिर्देवस्य वामारभ्य
प्रादक्षिण्येनमइतिशक्तिभ्यो दिव्ययोगिनीभ्यो नमः अंतरि
क्षयोगिनीभ्यो भूमिष्ठयोगिनीभ्यो सर्वयोगिनीभ्यो इति सं
पूज्य तद्बहिरिंद्रादीनपि प्रागुक्तविधिना संपूज्य प्रावधूपदी
पादिदत्त्वा शेषं समापयेदिति तथा जितेंद्रियो हविष्याशी ज
पेदेनं मंत्रं प्रिये पंचविंशत्सहस्राथ पंचलक्षं तद्दशांशतः हुने
त्तिलैस्त्रिमधुरैस्तर्पयेत दशांशतः अभिषिंच्यात्मनो मूर्द्धि
मूलमंत्रेण साधकः मार्जनस्य दशांशेन ब्राह्मणान्भोजयेद्वि
ये। अयंकल्पस्तृगानपः। एवमत्रालेखनात दद्दाद्दिमेवचे
तियामलप्रोक्तत्वात् अत्रामेकविंशतिलतत एतत्तख्या।

वि॰
तं॰
१३९
१३४

कथंनेत्तुकलियुगमारभ्याकृतयुगपर्यंतपरमितित्वेयं ईश्व
